९। / ७

अर्थ

प्रयोगरत्नम् ।

नारायणभट्टीयम्

३६।

८१ / ६

Prayoga Ratnam

प्रयोगरत्नम्

नारायणभट्टप्रणीतम्

91/6

त्वमग्निरिदृतायतः।। तवप्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्चनोद
मे।। स्वाहा।। २।। त्वमग्न इंद्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः।। त्वं
ब्रह्मा रयिविद्ब्रह्मणस्पते त्वं विधर्तः सचसे पुरंध्या।। स्वाहा।। त्वमग्ने राजा व
रुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः।। त्वमर्यमा सत्पतिर्यस्य संभुजं
त्वमंशो विदथे देव भाजयुः स्वाहा।। ४।। त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्ना
वो मित्रमहः सजात्यं।। त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पु
रूवसुः।। स्वाहा।। ५।। त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारु
तं पृक्ष ईशिषे।। त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नुत्म

D 91/6

प्रयोगरत्नम्

नारायणभट्टप्रणीतम्

त्वमग्निरिद्धतायतः॥ तवप्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नोद
मे॥ स्वाहा॥ १॥ त्वमग्न इंद्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः॥ त्वं
ब्रह्मा रयिविद्ब्रह्मणस्पते त्वं विधर्तः सचसे पुरंध्या॥ स्वाहा। त्वमग्ने राजा व
रुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः॥ त्वमर्यमा सत्पतिर्यस्य संभुजं
त्वमंशो विदथे देव भाजयुः स्वाहा॥ ४॥ त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्ना
वो मित्रमहः सजात्यं॥ त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पु
रूवसुः॥ स्वाहा॥ ५॥ त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारु
तं पृक्ष ईशिषे। त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नुत्म

७८

ना॥ स्वाहा॥ त्वमग्ने द्रविणोदा अरंकृते त्वं देवः सविता रत्नधा असि॥ त्वं
भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेऽविधत्॥ स्वाहा॥ ७॥ त्वामग्ने दम
आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृंजते। त्वं विश्वानि स्वनीक पत्यसे
त्वं सहस्राणि शता दश प्रति॥ स्वाहा॥ ८॥ त्वामग्ने पितरमिष्टिभिर्नरस्त्वां
भ्रात्राय शम्या तनूरुचं॥ त्वं पुत्रो भवसि यस्तेऽविधत् त्वं सखा सुशेवः
पास्याधृषः॥ स्वाहा॥ ९॥ त्वमग्न ऋभुराके नमस्य१ स्त्वं वाजस्य क्षुमतो
राय ईशिषे॥ त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः॥
स्वाहा॥ १०॥ त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा॥

राम
७८

।पृथिवीरादसीउभे॥स्वाहा॥१५॥परोनृभ्योगामश्वग्रामश्वपेशस
मश्नेरातिमुपसृजंतिसूरयः॥अस्माकंत्वांश्वप्रहिनेषिवस्यऽआहृह
हृदेमविदथेसुवीराः॥स्वाहा॥१६॥कद्रुद्रायेतिएणां घोरःकण्वोरुद्रो
गायत्री॥तृणामैत्रावरुणी॥उपाहुतिहोमेविनियोगः॥कद्रुद्रायप्रचे
तसेमीळ्हुष्टमायतव्यसे॥वोचेमशंतमंहृदे॥स्वाहा॥रुद्रायेदंन०
सर्वत्रत्यागः॥यथानोअदितिःकरत्पश्वेनृभ्योयथागवे॥यथानोकाय
रुद्रियं॥स्वाहा॥१७॥यथानोमित्रोवरुणोयथारुद्रश्चिकेतति॥यथावि
श्वसजोषसः॥स्वाहा॥१८॥गाथपतिंमेधपतिंरुद्रंजलाषभेषजं॥तं

त्वमिला शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती॥ स्वाहा॥ ११॥
त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः॥ त्वं वाजः प्रतर
णो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः॥ स्वाहा॥ १२॥ त्वामग्न आ
दित्यास आस्यं त्वां जिह्वां शुचयश्चक्रिरे कवे॥ त्वां रातिषाचो अध्वरे
षु सश्चिरे त्वे देवा हविरदंत्याहुतं स्वाहा॥ १३॥ त्वे अग्ने विश्वे अमृतासो
अद्रुहः आसा देवा हविरदंत्याहुतं॥ त्वया मर्तासः स्वदंत आसुतिं त्वं गर्भो
वीरुधां जज्ञिषे शुचिः स्वाहा॥ १४॥ त्वं तान्सं च प्रति चासि मज्मनाग्ने
सुजात प्र च देव रिच्यसे॥ पृक्षो यदत्र महिना वि ते भुवदनु द्यावा

तच्छंयोः सुम्नमीमहे॥ स्वाहा॥४॥ यः शुक्र इव सूर्यो हिरण्यमिव रोचते श्रे
ष्ठो देवानां वसुः॥५॥ शं नः करत्यर्वते सुगं मेषाय मेष्ये॥ नृभ्यो नारिभ्यो ग
वे॥६॥ इमा रुद्राय तवस इत्येकादशर्चस्य सूक्तस्य कुत्सो रुद्रो जगती॥
अंते त्रिष्टुभौ॥ उपाकृति होमे विनियोगः॥ इमा रुद्राय तवसे कपर्दि
ने क्षयद्वीराय प्रभरामहे मतीः॥ यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं
ग्रामे अस्मिंननातुरं॥ मृला नो रुद्रोत नो मयस्कृधि क्षयद्वीराय न
मसा विधेम ते॥ यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणी
तिषु॥१॥ अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः

८०

सुम्नायन्निद्विशो ऽस्माकमाचरारिष्टवीराजुहवाम ते हविः॥ त्वेषं
वयंरुद्रंयज्ञसाधंवंकुंकविमवसेनिह्वयामहे॥ आरे अस्मद्दैव्यंहेलोअ
स्यसुमतिमिद्वयमस्यावृणीमहे॥ स्वाहा॥४॥ दिवोवराहमरुषंकपर्दि
नंत्वेषंरूपंनमसानिह्वयामहे॥ हस्तेबिभ्रद्भेषजावार्याणिशर्मवर्मछ
र्दिरस्मभ्यंयंसत्॥ इदंपित्रेमरुतामुच्यतेवचःस्वादोस्वादीयोरुद्रायव
र्धनं॥ रास्वाचनोअमृतमर्तभोजनंत्मनेतोकायतनयायमृळा॥ मा
नोमहान्तमुतमानोअर्भकंमानउक्षन्तमुतमानउक्षितं॥ मानोव
धीःपितरंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः॥ मानस्तोकेत

राम
८०

नेयमानआयौमानोगोषुमानोअश्वेषुरीरिषः॥वीरान्मानोरुद्रभामितो
वधीर्हविष्मंतःसदमित्वाहवामहे॥उपतेस्तोमान्पशुपाइवाकरंरा
स्वापितरमरुतांसुम्नमस्मे॥भद्राहितेसुमतिर्मृळयत्तमाथावयमव
इत्तेवृणीमहे॥स्वाहा॥आरेतेगोघ्नमुतपूरुषघ्नंक्षयद्वीरसुम्नमस्मे
तेअस्तु॥मृळाचनोअधिचब्रूहिदेवाधाचनःशर्मयच्छद्विबर्हाः॥१०
स्वाहा॥अवोचामनमोअस्माअवस्यवःशृणोतुनोहवंरुद्रोमरुत्वा
न्॥तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउतद्यौः
स्वाहा॥११॥आतेपितर्मरुतांमितिपंचदशर्चस्यसूक्तस्यगृत्समदो

८१

रुद्रस्त्रिष्टुप्॥ उपाकृतिहोमे विनियोगः॥ आतपितर्मरुतांसुम्नमेतुमानः
सूर्यस्यसंदृशोयुयोथाः॥ अभिनोवीरोअर्वतिक्षमेतप्रजायेमहिरुद्रप्र
जाभिःस्वाहा॥ त्वादत्तेभीरुद्रशंतमेभिःशतंहिमाअशीयभेषजेभिः
व्यस्मद्द्वेषोवितरंव्यंहोव्यमीवाश्चातयस्वाविषूचीः॥ श्रेष्ठोजातस्य
रुद्रश्रियासितवस्तमस्तवसांवज्रबाहो॥ पर्षिणःपारमंहसःस्व राम
स्तिविश्वाअभीतीरपसोयुयोधिस्वाहा॥ मात्वारुद्रचुक्रुधामा ८१
नमोभिर्मादुष्टुतीवृषभमासहूती॥ उन्नोवीरांअर्पयभेषजेभिर्भि
षक्तमंत्वाभिषजांशृणोमि॥ स्वाहा॥ ४॥ हवीमभिर्हवतेयोहविर्भि

रवस्तोमभी रुद्रं दिषीय॥ ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो
रीरधन्मनायै॥ ५॥ उन्मा ममंद वृषभो मरुत्वांत्वक्षीयसा वयसा नाध
मानं॥ घृणीव च्छायामरपा अशीयाविवासेयं रुद्रस्य सुम्नं॥ स्वाहा॥ ६
क्व स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः॥ अपभर्ता
रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः॥ स्वाहा॥ ७॥ प्र बभ्रवे वृ
षभाय श्वितीचे महो महीं सुष्टुतिमीरयामि॥ नमस्या कल्मलीकि
नं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम॥ स्थिरेभिरंगैः पुरुरूप उ
ग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः॥ ईशानादस्य भुवनस्य भूरेर्न

वाउयोषद्रुद्रादसुर्यं॥स्वाहा॥९॥अर्हन्बिभर्षिसायकानिधन्वार्हन्निष्कंय
जतंविश्वरूपं॥अर्हन्निदंदयसेविश्वमभ्वंनवाऽओजीयोरुद्रत्वदस्ति।
स्वाहा॥स्तुहिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रं॥मृळाज
रित्रेरुद्रस्तवानोन्यंतेऽस्मन्निवपंतुसेनाः॥स्वाहा॥११॥कुमारश्चि
त्पितरंवंदमानंप्रतिनानामरुद्रोपयंतं।भूरेर्दातारंसत्पतिंगृणीषे
स्तुतस्त्वंभेषजारास्यस्मे॥१२॥स्वाहा॥यावोभेषजामरुतःशुचीनिया
शंतमावृषणोयामयोभु॥यानिमनुरवृणीतापितानस्ताशंचयोश्च
रुद्रस्यवश्मि॥स्वाहा॥परिणोहेतीरुद्रस्यवृज्याःपरित्वेषस्यदुर्म

८२

राम

८२

तिर्महीगातु॥अवच्छिद्रामधयवज्ञ्यस्तानुघमीदुस्तोकायतनयायमृळा॥
स्वाहा॥१४॥एवाबभ्रोवृषभचेकितानयथादेवनहृणीषेनहंसि॥हे
वनश्रुंनोरुद्रेहबोधिबृहद्वदेमविदथेसुवीराः॥स्वाहा॥१५॥रुद्राये
दंनमम॥एतैरेकाशीतिमंत्रैःप्रतिमंहुत्वास्वाहातैरण्याहुतिंहुत्वा॥
ततःघंटादिवादित्रशब्दैर्वैद्यमाराधितेकुचलवारिंमहद्देवताध्यावरु
णायधूपदीपनैवेद्यतांबूलादीन्समर्प्यप्रसीदंतुभवंतः॥इतितान्
संप्रार्थ्यरुद्रादिगन्वारब्धपैश्चरुतिलव्रीहिभोषणस्विष्टकृतंहुत्वा
रुद्धमसत्वहनेमभ्योप्रास्यप्रायश्चित्तादिहोमशेषंसमाप्य॥बलिदा

८३

नंकुर्यात्॥ तत्र यजमानः हस्तस्य कर्मणः सांगता सिध्यर्थं बलिदानं करि
ष्ये॥ इंद्रं वो मधुच्छंदा इंद्रो गायत्री॥ इंद्रप्रीत्यर्थे बलिदाने विनियोगः।
इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः॥ अस्माकमस्तु केवलः॥ इंद्रा
य सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपं माषभक्ता
न्नबलिं समर्पयामीति पूर्वाभिमुखः साक्षतपुष्पजलहस्तो बलिं निवे
द्य॥ भो इंद्र दिशां रक्ष बलिं भक्ष मम सकुटुंबस्याभ्युदयं कुरु॥ आ
युष्कर्ता क्षेमकर्ता शांतिकर्ता शुभकर्ता भव॥ इति प्रार्थयेत्॥ एताव
दन्यबलिदाने पियहबलिदाने च दिशां रक्षेति वर्जयेत्॥ अग्निं

राम
८३

दूतंमेधातिथिरग्निर्गायत्री॥ अग्निप्रीत्यर्थेबलिदानेविनियोगः॥ अग्निं
दूतंवृणीमहे०॥ अग्नयेसांगाय०॥ आग्नेयाभिमुखो०॥ भो अग्नेदिशंर
क्ष॥ यमायसोमंपयमोनुष्टुप्॥ यमप्रीत्यर्थेबलि०॥ यमायसोमंसुनु०
यमायसांगाय०॥ दक्षिणाभिमुख०भो यमदिशंरक्ष०॥ मोषुणःकण्वो
निर्ऋतिर्गायत्री॥ मोषुणःपरापरा नि०॥ निर्ऋत्यैसांगाय०॥ नैर्ऋत्याभि
मुखः॥ भो निर्ऋते०॥ उदुत्तमंमित्यस्यशुनःशेपोवरुणोगायत्री॥ उदुत्तमं
मुमुग्धिनोविपाशंमध्यमंवृत्त॥ अवाधमानिजीवसे॥ वरुणायसांग
य०॥ पश्चिमाभिमुखः भोवरुणदिशं०॥ तववायोआंगिरसोव्यश्वोवायु

राजंनयाय तः। नरिष्येत्वावतः सखा। ३

गायत्री॥ तववायवृतस्पते त्वष्टुर्जा०॥ वायवे सं गाय०॥ वायव्याभिमुखः भो
वायो दिशं रक्ष०॥ त्वं नः सोम इत्यस्य गोतमः सोमो विश्वेदेवा गायत्री॥ त्वं
८४ नः सोम विश्वतो रक्षा०॥ कुबेराय सं गाय०॥ उत्तराभिमुखः भो कुबेर दि
शं रक्ष०॥ कद्रुद्राय कण्वो रुद्रो गायत्री॥ कद्रुद्राय प्रचेतसे०॥ ईशानाय सं
गाय०॥ ईशान्याभिमुखः भो ईशान दिशं रक्ष०॥ आकृष्णे॥ न हिरण्य राम
स्तूप०॥ आदित्याग्निरुद्राधिदेवतां सहिताय इमं सदीपं माष ८४
भक्तान्नबलिं समर्पयामि॥ भो आदित्य बलिं गृह०॥ आप्यायस्व गोतमः
सोमो गायत्री॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं॥ भवा०

प्रत्यथी देवता

सोमायअपामधिदेवताप्रत्यधिदेवतासहितायइदं०॥भोसोमब०॥अ
ग्निर्मूर्धाविरूपोंगारकोगायत्री॥अग्निर्मूर्धा०॥अंगारकायभूमिस्कंदा
धिदेवतासहितायमं०॥भोअंगारकबलिं०॥उद्बुध्यध्वंबुधसौम्यत्रि
ष्टुप्॥उद्बुध्यध्वं०॥बुधायविष्णुपुरुषाधिदेवताप्रत्यधिदेवतासहि
ताय०॥भोबुधबलिं०॥बृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप्॥बृह
स्पतेअतियदर्यो०॥बृहस्पतयइदंब्रह्माधिदेवताप्रत्यधिदेवतास
हितायइदं०॥भोबृहस्पतेबलिं०॥शुक्रंतेभारद्वाजःशुक्रस्त्रिष्टुप्॥
शुक्रंतेअन्यद्यजतंतेअन्यद्विषुरूपेअहनीद्यौरिवासि॥विश्वाहि०

८५

शुक्राय इंद्राणींद्राधिदेवताप्रत्यधिदेवतासहितायइमं०॥ ओ शुक्र बलिं०
शमाग्नीपिपिंबिठः शनिर्कुछिपाकु॥ शमग्निरग्नि०॥ शनैश्चराय प्रजाप
तिपमाधिदेवताप्रत्यधिदेवतासहितायइमं०॥ ओ शनैश्चर बलिं०॥
कयानो वामदेवो राहुर्गायत्री॥ कयानः॥०॥ राहवे सर्पकालाधिदे
वताप्रत्यधिदेवतासहितायइ०॥ ओ राहो बलिं०॥ केतुमधुछंदाः
केतुर्गायत्री॥ केतुंकृण्वन के०॥ केतवे ब्रह्मचित्रगुप्ताधिदेवताप्र
त्यधिदेवतासहितायइमं०॥ ओ केतो बलिं०॥ आतूनइंद्रः कु
एवः कुसीदी विनायको गायत्री विनायकप्रीत्यर्थं बलिदाने विनि

राम
८५

चित्रं ग्रा॰ अंतं संग॰ भा॰ ॥ महा॰ स्तीदासि दोन ।१

आतूनं इ॰ शुभं तं॰ ॥ विनायकाय सांगाय ॥ भो विनायक बलिं ग्र॰ ॥ जातवे
दसे क॰ अयो दुर्गा त्रिष्टुप् ॥ दुर्गा प्रीत्यर्थे ॥ जातवेदसे ॥ दुर्गायै सांगायै सप
रिवारायै सायुधायै सशक्तिकायै एतं सदीपं ॥ भो दुर्गे बलिं गृह्ण ॥ आयुः क
त्री क्षेमकर्त्री शांतिकर्त्री शुभकर्त्री शिवा ॥ काण्व ऋषि शुहिति आप्यस्त्रितो वायु
रुष्णिक् ॥ काण्व ऋषि शु मेहीनां॰ ॥ वायवे सांगाय ॥ भो वायो बलिं गृह्ण॰ ॥
आदित्प्रत्नस्येति काण्वो वत्स आकाशो गायत्री ॥ आदित्प्रत्नस्य रेतसः॰
आकाशाय सांगाय ॥ भो आकाश बलिं ॥ अश्विनावर्तिरिति गणो गौतमो
श्विनावुष्णिक् ॥ अश्विप्रीत्यर्थे बलिदाने ॥ अश्विभ्यां सांगाभ्यां सपरि

हिन्वं चैतस्य दीधितिं । विश्वापरि प्रियाः , वदध द्विता ।४

वाराभ्यां सशक्तिकाभ्यां एतं माषभक्तबलिं समर्पयामि ॥ भो अश्विनौ बलिं
८६ भक्षा ०॥ आयुष्कर्तारौ क्षेमकर्तारौ तुष्टिकर्तारौ शांतिकर्तारौ पुष्टिक
र्तारौ शुभकर्तारौ भवतां ॥ क्षेत्रस्यपतिना वामदेवः क्षेत्रपालो नुष्टुप् ॥
क्षेत्रपालप्रीतये बलिदाने विनि०॥ क्षेत्रस्यपतिना वयं हितेने०॥ क्षेत्र
पालभूतप्रेतपिशाचब्रह्मराक्षसशाकिनीडाकिनीवेतालादिपरिवार राम
युताय इमं सदीपं माषभक्तान्नबलिं समर्पयामि ॥ ततो यजमानः पादौ ८६
प्रक्षाल्य आचम्य कालादि स्मृत्वा कृतस्य नवग्रहमखकर्मणः सांगतासि
ध्यर्थं पूर्णाहुतिं होष्यामीति संकल्पयेत् ॥ सर्वकर्मप्रपूरणे मद्द्रव्य

द्दां पूर्णाहुतिं जुहुयात्॥ तद्यथा॥ आचार्यः॥ द्वादशगृहीतेन स्रुचं पूर
यित्वा॥ नारिकेलमहाफलादिगंधवस्त्रमाल्यादिक्षिप्तं स्रुचं निधाय
स्रुगंतं घृतेनापूर्य तदुपरि न्यग्बिलं स्रुवं निधाय शंखमुद्राकृतहीवास
पत्नीकयजमानान्वारब्धः सन्॥ आचार्यः तिष्ठन् पूर्णाहुतिं जुहुयात्॥
तत्र मंत्राः॥ समुद्रादूर्मिर्मधुमान्॥०॥ मम्नेनस्यन्नाभिः॥१॥ मूर्धानं
दिवो बार्हस्पत्यो भरद्वाजो वैश्वानरस्त्रिष्टुप्॥ पूर्णा०॥ याग॥ मूर्धानं
दिवो अरतिं पृथिव्या०॥ जनयंत देवाः॥ २॥ पुनस्त्वादित्या अग्निर्वसुरुद्रा
दित्यास्त्रिष्टुप्॥ उपाहुतिहोमे विनियोगः॥ पुनस्त्वादित्या रुद्रा वसवः

८७ समिधतांपुनर्ब्रह्मणावसुनीथयज्ञैः॥घृतेनत्वंतनुवोवर्धयस्वसत्याःसंतुयजं
मानस्यकामाः॥सप्ततेअग्नेसमिधावानग्निर्जगती॥पूर्णाहुतिहोमेवि
नियोगः॥सप्ततेऽग्नेसमिधःसप्तजिह्वाःसप्तऋषयःसप्तधामप्रि
याणि॥सप्तहोत्राःसप्तधात्रायजंतिसप्तयोनीरापृणस्वाघृतेन॥
धामंतेवामदेवआपोजगती॥पूर्णाहुतिहोमेविनियोगः॥धामं राम
तेविश्वंभुवनमधिश्रितमंतः०॥मधुमंतंतउर्मिं॥रुद्रमग्नयेवैश्वा ८७
नरायऋतसुरुद्रादित्येभ्यःशतक्रतोवोसप्तवतेमये१ऊर्ध्वनमम॥
होमांतेचरुविज्ञाः॥पूर्णाहुतिमुत्तमांजुहोति॥सर्वंवैपूर्णाहुतिः॥

सर्वमेवाप्नोति॥ अथोद्यंवैपूर्णाहुतिः॥ अस्यामेवप्रतितिष्ठति॥ इतिमं
त्रंपठेत्पुः॥ केचित्तु॥ पूर्णाहुत्यर्थेचतुर्गृहीतंद्वादशगृहीतंवा॥ ज्यंसावघेलं
हुत्वा॥ विन्योतिषेतिमंत्रेणावशिष्टमाज्यंजुहोति अथाग्नौघृतेनवसो
र्धारांपातयेत्॥ अग्निमीलेतिनवर्चस्यसूक्तस्यवैश्वामित्रोमधुच्छंदाअग्नि
र्गायत्री॥ वसोर्धारायांविनियोगः॥ अग्निमीलेपुरोहितं॥०॥१॥
स्वादिष्ठयादशर्चस्यपवमानसोमोगायत्री॥ वसोर्धारा०॥ स्वादिष्ठ्या
मदिष्ठयापवस्वसोमधारया॥ इंद्रायपातवेसुतः स्वाहा॥०॥१०॥ वि
ष्णोर्नुकंमितिषण्णांऔचथ्योदीर्घतमाविष्णुस्त्रिष्टुप्॥ वसोर्धारायां०

विष्णोनुकं।वीर्याणि।।०।।अग्नेपृत्तरिति पंचदशर्चस्य सूक्तस्य शौनको
गृत्समदो रुद्रस्त्रिष्टुप्।।वसोर्धारायां।।०।।आ ते पितर्मरुतां सुम्नमेतु।०
।।१५।।वसोर्धारां जुहोति वसोर्मे धारासदिति वा एषा हूयते घृतस्य वा
यन्नमेषा धारामुष्मिंल्लोके पिन्वमानोपतिष्ठत आज्येन जुहोति तेजो वसो
र्धारा।तेजसैवास्मै तेजोवरुंधे यो कामा वै वसोर्धारा कामानेवावरुंधे
यं कामयेत प्राणानस्यां ~~नस्य~~ नाघ्रं वांति।।विश्वेभ्यो देवेभ्यः संस्रावं हु
त्वा।।पूर्णपात्रंनिनयनोपस्थानपरिस्तरणविसर्जनपरिसमोहनप
र्युक्षणाभ्यर्चनपात्रोत्सर्जनादि कुर्यात्।।अथ मंडपेशाने पंचरंगैः

स्वस्तिकं कृत्वा चतुष्पादं दीर्घं चतुरस्रसोत्तरच्छदं तत्र पीठं निधाय ॥
तत्रोदगग्रान् हरितदर्भानास्तीर्य तत्र सामात्यं यजमानं सजनं
प्राङ्मुखमुपवेश्य ॥ आचार्यऋत्विग्भिः सह मंगलवाद्यैरभिषेकं
कुर्यात् । उदकपात्रांतरे आदाय प्रत्यङ्मुखस्तिष्ठन् ॥ सपलाशमौदुंबर
दूर्वया शाखया सहिरण्यपवित्रया सकुशदूर्वापल्लवया हस्तमंत्रधा
यादकस्पृष्टद्रव्यलिंगाभिर्वारुणीभिः पावमानीभिरन्याभिश्च शा
तिपवित्रलिंगाभिर्भूर्भुवस्वरिति व्याहृतिभिरभिषिंचेत् ॥ ते च
मंत्राः ॥ आपो हिष्ठेति वर्चस्यां बलीषः सिंधुद्वीप आपो गायत्री

८०

पंचमीवर्धमानासप्तमीप्रतिष्ठा॥ अंतेहृदनुष्टुप्सो अभिषेकेविनि
योगः॥ आपोहिष्ठामयोभुवः॥०॥ प्रसम्राजइत्यष्टर्चस्यसूक्तस्या
त्रिर्वरुणस्त्रिष्टुप्॥ प्रसम्राजेबृहदर्चागभीरं॥०॥ अथातस्यामवस
णप्रियासः॥८॥ स्वादिष्ठयेतिदशर्चस्यसूक्तस्यमधुच्छंदाःपवमान
सोमोगायत्री॥ स्वादिष्ठयामदिष्ठयाप १० आनइंद्राग्नीतिपंचद राम
स्य शर्चवसिष्ठोविश्वेदेवास्त्रिष्टुप्॥ अभिषेकेवि०॥ आनइंद्राग्नीभि
र्वतामवोभिः॥०॥ यूयंपातस्वस्तिभिःसदानः॥१५॥ पवित्रंतेवित ८०
तंब्रभितिपंचर्चस्यवर्गस्यांगिरसःपवित्रपावमानसोमोजगती

अभिषेके०॥पवित्रं तेवित्तं तं ब्रह्मणस्पते प्र०॥सहस्रभृष्टिर्जयसि श्रवो
बृहत्॥पू॥अथ नवग्रहमंत्रः॥ग्रहाणामादिरादित्यो लोकरक्षणका
रकः॥विषमस्थानसंभूतां पीडां दहतु मे रविः॥१॥रोहिणीशः सुधामू
र्तिः सुधागात्रः सुधाशनः॥विषमस्थानसंभूतां पीडां हरतु मे विधुः॥२
भूमिपुत्रो महातेजा जगतां भयकृत्सदा॥वृष्टिकृद्वृष्टिहर्ता च पीडां हरतु
मे कुजः॥३॥उत्पातरूपो जगतां चंद्रपुत्रो महाद्युतिः॥सूर्यप्रियकरो विद्वा
न्पीडां हरतु मे बुधः॥४॥देवमंत्री विशालाक्षः सदा लोकहितेरतः॥
अनेकशिष्यसंपूर्णः पीडां दहतु मे गुरुः॥५॥दैत्यमंत्री गुरुस्तेषां प्राण

रश्च महामतिः॥ प्रभुस्ताराग्रहाणां च पीडां दहत्वसौ॥ भृगुः॥६॥ सूर्यपु
त्रो दीर्घदेहो विशालाक्षः शिवप्रियः॥ मंदचारः प्रसन्नात्मा पीडां द
१० हतु शनिः॥ महाशिरा महावक्त्रो दीर्घदंष्ट्रो महाबलः॥ अतनुश्चो
र्ध्वकेशश्च पीडां दहतु तमः॥ अनेकरूपवर्णैश्च शतशोथ सहस्रशः॥
उत्पातरूपो जगतां पीडां दहतु ते शिखी॥९॥ अथ देवमंत्राः॥ सु
रास्त्वामभिषिंचंतु ब्रह्मा विष्णुमहेश्वराः॥ वासुदेवो जगन्नाथ राम
स्तथा संकर्षणो विभुः॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ १०
आखंडलोग्निर्भगवान् यमो वै निर्ऋतिस्तथा॥ वरुणः पवनश्चै

वधनाध्यक्षस्तथाशिवः॥ब्रह्मणासहिताःसर्वेदिक्पालाःपांतुतेसदा॥
कीर्तिर्लक्ष्मीधृतिर्मेधापुष्टिश्रद्धाक्रियामतिः॥बुधिर्लज्जावपुःशांति
स्तुष्टिःकांतिश्चमातरः॥एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः॥
आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः॥ग्रहास्त्वामभिषिंचंतुरा
हुकेतुश्चतर्पिताः॥देवदानवगंधर्वयक्षराक्षसपन्नगाः॥ऋषयोमु
नयोगावोदेवमातरएवच॥देवपत्न्योद्रुमानागाः॥दैत्याश्चाप्सरसांग
णाः॥अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच॥औषधानिचर
त्नानिकालस्यावयवाश्चये॥सरितःसागराःशैलास्तीर्थानिजलदा

नदाः॥ एते वां मभिषिंचंतु सर्वकामार्थसिद्धये॥ इत्येतैर्मंत्रैः प्रतिमंत्र
९१ मभिषिच्य श्रीसूक्तेन हिरण्यवर्णाभिरापो हिष्ठादिना इमा आपः शिवतमा इ
ति त्रयेण देवस्य त्वेति च यजुषा पाप्मा मृत्युरपहत इत्येनाभिश्च व्याहृतिभिश्चा
भिषिंचेत्॥ एवमभिषिक्तो यजमानः श्वेताहतवस्त्रयुगं गंधमाल्याभ
रणं च बिभृयात्॥ ततः आचार्यो दिक्षु विदिक्षु च बलिमुत्क्षिप्य सु रम
वासिनीभिः नीराजनं कारयेत्॥ अथ यजमानो गृहदेवताभ्यः अनु ९१
र्यं तद्देवतानामभिः पुष्पाणि राज्यपर्याचार्येण ध्याहृत्य सत्कारेण पूर्व
कं गृहोद्वासनं कारयित्वाचार्यप्रभृतिभ्यः जपहोमफलं गृहीत्वा

तेभ्यो दक्षिणां दद्यात्॥ अथ श्रेयः संपादनादि प्रयोगः॥ आचार्यादयः॥
यजमानं स्वहस्ते शिवा आपः सन्त्विति जलं क्षिपेत्॥ सौमनस्यमस्त्व
ति पुष्पाणि॥ अक्षतं चारिष्टं चास्त्विति अक्षतान्॥ दीर्घमायुः श्रेयः
शांतिपुष्टिस्तुष्टिश्चास्तु॥ इति पुनर्जलं॥ मया भवन्नियोगेन यत्कृ
तं जपः यत्कृतः समिदाज्यचरुतिलहोमादि यदुत्पन्नं श्रेयः तत्तुभ्य
महं संप्रददे न मम इति वदेत्॥ एवं सर्वेभ्यो गृहीतेभ्यो दक्षिणां
दद्यात्॥ ततः॥ तत्र यजमानः कृतस्य कर्मणः सांगतासिध्यर्थं
दक्षिणादानं कृत्वा आचार्यादीन् पूजयित्वा॥ तेभ्यश्च दक्षिणां दा

१२ नंच करिष्य इति संकल्प्य तानुसंपूज्य दक्षिणां दद्यात् ॥ गौः शंखौर
क्रौनड्वान्हिरण्यं पीतवासः श्वेताश्वः रक्ता गौः ॥ कार्ष्णायसं ह
छागो वेति ग्रहक्रमेण ॥ अत्र न्यूनदक्षिणां तु यस्य दक्षिणाया हिरण्ये
न सह भार्यआघगवावा ॥ एतदभावे सर्वेभ्यो यथाशक्ति हिरण्यं द
द्यात् ॥ आचार्याय द्विगुणं अन्येभ्यश्च यथाशक्ति ... ततः का
स्यपात्रगताज्ये रूपं रूपं प्रतिरूपो बभूवेति मंत्रेण सकुटुंबः स्वप्रति राम
रूपं प्रेक्ष्य आज्यै तेजः समुद्दिष्टमायुःपापहरं स्मृतं ॥ आज्यं सुराणा १२
माहार आज्ये देवाः प्रतिष्ठिताः इति मंत्रं पठित्वा तदाज्यं सदक्षिणं ब्रा

ह्मणाय दद्यात्॥ तत्क्रमेण दानमंत्राः॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्द
श॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च॥ १॥ कपिले सर्वदेवानां पू
जनीयासि रोहिणी॥ तीर्थरूपमयी यस्मादतः शांतिं प्रयच्छ मे॥ २॥ गोदा
न कपिलदानमंत्रौ॥ शंखस्य॥ पुण्यस्त्वं शंख पुण्यानां मंगलानां च मंग
लं॥ विष्णुना विधृतो यस्मादतः शांतिं प्रयच्छ मे॥ ३॥ वृषभस्य॥ धर्मस्त्वं
वृषरूपेण जगदानंदकारक॥ अष्टमूर्तेरधिष्ठानमतः शांतिं॥ ४॥ हेमस्य॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः॥ अनंतपुण्यफलदमतः शांतिं पु
पीतवस्त्रस्य॥ पीतवस्त्रद्वयं यस्माद्वासुदेवस्य वल्लभं॥ प्रदानात्तस्य मे विष्णुः
रतः शां॥ ६॥ अश्वस्य॥ विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः॥ चंद्र

९३ र्कवाहनानि नित्यमतः शांतिं॥७॥ कृष्णधेनोः॥ यस्मात्वं पृथिवी सर्वा धेनुः कृष्णा
नसंनिभा॥ सर्वपापहरा निमतः॥८॥ आयसस्य॥ यस्मादायसकर्माणि त
वाधीनानि सर्वदा॥ लांगुलाद्यायुधादीनि तस्मात्छांतिं प्रयच्छ मे॥९॥ छा
गस्य॥ यस्मात्वं छागयज्ञानां अंगत्वेन व्यवस्थितः॥ यानं विभावसोर्नित्य
मतः शांतिं॥१०॥ अवेक्षितान्यौत्यं॥ पात्रदानं॥ आज्यपात्रेमत्फजयमा राम
वाह्य संपूज्य ब्रह्मणं च संपूज्य॥ ततः कांस्यपात्रगताज्ये॥ रूपं रूपं प्रति
रूपो बभूवेति मंत्रेण सकुटुंबः स्वरूपं अवेक्ष्य॥ रूपं रूपं भरद्वाजगर्गइं ९३
द्रस्त्रिष्टुप्॥ आज्यमुखावेक्षणे विनियोगः॥ रूपं रूपं प्रतिरूपो बभूव
त॥०॥ दानमंत्रः॥ यालक्ष्मीयज्ञमेदाष्टं सर्वगात्रेष्ववस्थिता॥ तसे

यदेवानू॥ इत्युक्त्वा तैणवाभ्यां छादनं दूरीकृत्य समस्तव्याहृतीनां परमेष्ठी प्रजाप
तिः प्रजापतिर्बृहती॥ अग्निप्रतिष्ठापने विनियोगः॥ ॐ भूर्भुवस्वरित्या[illegible]माभि
मुखं पाणिभ्यां षड्गुलेखासु तत्कर्मसु विहितनामकममुकनामकमग्निं प्रतिष्ठा
पयामीत्यग्निं प्र तिष्ठाप्य पात्रे अक्षतोदकं प्रक्षिप्य पात्रे द्वयमेकीकृत्य प्रोक्षितें
धनानि निक्षिप्य वेणुधमन्या प्रबोध्य॥ ध्यायेद्देवं॥ चत्वारिशृंगा वामदेवोऽग्निस्त्रि
ष्टुप्॥ अग्निध्याने विनियोगः॥ चत्वारिशृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्ता
सो अस्य॥ त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश॥ स्मृतिमंत्रश्च।
सप्तहस्तश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः॥ त्रिपात्प्रसन्नवदनः सुखासीनः
शुचिस्मितः॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा॥ बिभ्रद्दक्षिण

१८

हस्ते स्रुग्राक्रिमन्त्रं स्रुचं स्रुवं॥ गोमयं व्यजनं वामे घृतपात्रं च धारयन्॥ मेषारूढोज
टाबद्धो गौरवर्णाभिहोत्तमः॥ धूम्रध्वजो लोहिताक्षः सप्तार्चिः सर्वकामदः॥ ओमा
भिमुखमासीन एवं रूपो हुताशनः॥ इति॥ ततोयदि समिदादौ समारोपिताग्नि
स्ताहि प्रत्यवरोहणं कार्यं॥ तच्चैवं॥ प्रत्यवरोहस्यस्य हिरण्यगर्भोग्निस्त्रिष्टुप्॥ अ
ग्निप्रत्यवरोहणे विनियोगः॥ प्रत्यवरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजा
नन्॥ प्रजां पुष्टिं रयिमस्मासु धेह्यथाभव यजमानाय शंयोः॥ इति मंत्रेण समारोपि
ताग्निसमिधं स्थापितेग्नौ प्रक्षिपेदिति॥ एतदंतं संस्थापितेग्नौ होमे कार्यं॥ नित्य
वे धारितहोमस्तु नैतावत्॥ ततः पार्वणस्थालीपाके प्रधानदिनात्पूर्वदिने सद्यस्काला
यां पौर्णमास्यामपक्षे वा प्रधानदिन एव प्रातरौपासनं हुत्वान्वाधानं कुर्यात्॥ त

राम
१८

गदेवताः प्रधानदेवताः सर्वाग्निसंहिताः संतु सांगोपांगेन कर्मणा श्रेयसे ॥ सद्य
स्काले तु सद्यो यक्ष्ये इति संकल्प्य ॥ तूष्णीं समस्तव्याहृतिभिर्वा समिधोमं कुर्या
११ त् ॥ व्याहृतिपक्षे व्याहृतीनामित्यादि पूर्ववत् ॥ अन्वाधानसमिध्योमे विनियो
गः ॥ ॐ भूर्भुवस्स्वः स्वाहेति प्रजापतय इदं न ममेति त्यागः ॥ तं चाग्निं धारयेत् ॥
हुतिं संकटे तु ॥ तूष्णींता इत्यस्य वाज्याहुतिं वा समासरोपयेत् ॥ तद्यथा ॥ तूष्णींताविरूपो राम
ग्निर्गायत्री ॥ हुतान्वाधानोऽग्नेः समारोपाधिकारार्थ प्रायश्चित्तान्याहुहोमे विनियो
गः ॥ तूष्णींता अग्ने गिरसां सामविप्राः सुक्षितयः पृथक् ॥ अग्ने कामाय येमिरे स्वा ११
हा ॥ अग्नय इदं न मम ॥ ततः त्रिभिः त्रिभिः कुशदलैः सव्यपाणिमधो दक्षिणं
चोपरि कुर्वन् पूर्वदलाग्रैरुत्तरदलमूलेश्च त्रिसंधि द्विगुणां रज्जुं कृत्वा ॥ पुनर्द

क्षिणमधः सव्यं चोपरि कुर्वन् तथैव त्रिगुणयेत् ॥ अंते प्रदक्षिणाग्रं ग्रंथिं दद्यात् ॥ ए
वं षड्भिः शरदर्भदलैरेका रज्जुर्भवति ॥ ततस्तस्यां मुदगग्रायां प्रादेशमात्रानुपु
ष्टिपरिमितान् दर्भान् निधाय तया बर्हिर्द्विरावेष्ट्य रज्ज्वग्रेण रज्जुमूलं सकृदावेष्ट्य ।
तदग्रशेषं पूर्ववेष्टितरज्ज्वा अधस्तान्निनीय परिस्तरणार्थदर्भैः सहास्थाय
तनास्पृश्याग्नेर्गोपरि निदध्यात् ॥ ततोन्यथा नातदृशैव कृत्वा तया रज्ज्वोदगग्रया पा
वे लाशखादि[illegible]रमसंभवे अमावृत्तादियज्ञियवृक्षसमय[illegible]नेमात्रं वितस्तिमा
त्रं वा पंचदश दारुकमिध्मं प्रागग्रं सकृदावेष्ट्य रज्जुमूलं सकृदावेष्ट्य पूर्ववन्नि
दध्यात् ॥ अत्रेध्माबर्हिषोर्बंधनेके विन्मंत्रा विच्छंति ॥ तत्र बर्हिषि ॥ इंद्राणी
संनहनं पूषा तेग्रंथिं बध्नातु ॥ स ते मास्थादिति ॥ इध्मे ॥ यत्ते कृष्णानुपंक्त

१०० वाप्राविशस्त्वं वनस्पतीन्॥ तत्र क्ष्मा पंचविंशतिधा संभराभिः सुसंभृता॥ इष्टा
स्याखरेष्टा देवपुरश्चरसैध्यासं त्वा इति॥ एकविंशतिधेस त्रयं पंचदशधेत्यूहेन
अन्ये त्वनूहमाहुः॥ अपरे तु मंत्रेण नेच्छंति॥ ततः पत्नी अग्न्यायतनालंकरणं
कुर्यात्॥ ततो दंपती गंधादिभिः स्वशरीरं अलंकृत्य तद्दिने कलहक्रियविक्र
यप्रहासानृतबहुभाषणचौर्यादिव्यसनपर्यंकशयनदंतधावनकरंभव राम
लिस्थकोद्रवचणकमसूरहत्ताकक्षारलवणकोरदूषकमधुमाषमांसम १००
धपरान्नोपवासतैलमैथुनानि वर्जयेत्॥ ततो दधिघृतपेयामिश्रं हविष्यान्नं दि
वैव सकृद्भुंजीयाताम्॥ श्राद्धकर्तुः श्राद्धशेषं माषाद्यन्नं भुंजीत॥ व्रतलोप
प्रायैः सह संवेशनेवा उपोष्य त्वमग्ने व्रतपा इत्यस्य चाज्याहुतिं जुहुयात्॥

ध्यं॥ आचम्य प्राणानायम्य समिद्द्वयं वा दाय देशकालौ स्मृत्वा मम मौपात्तदुरितत्रयं
क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं दर्शपूर्णमासाभ्यां स्थालीपाकाभ्यां यक्ष्ये॥ तत्रेदा
नीं पौर्णमासेन यक्ष्ये॥ दर्शे तु पूर्वसंकल्पितेन दर्शस्थालीपाकेन यक्ष्य इति विशेषः॥
तत्र देवतापरिग्रहार्थमन्वाधानं करिष्ये॥ इति संकल्प्य॥ अस्मिन्नन्वाहिते ग्नौ
जातवेदसमग्निमिध्मेन प्रजापतिं प्रजापतिमाघारौ वाज्येन अग्नीषोमौ चक्षुषी
ग्निम आज्येन अग्नीषोमौ च प्रधानदेवते चरुद्रव्येण॥ दर्शे तु॥ अग्निमिंद्राग्नी च प्रधा
नदेवते चरुद्रव्येणेति विशेषः॥ शेषेण स्विष्टकृतमिध्मसन्नहनेन रुद्रमयासम
ग्निं देवान्विष्णुमग्निं वायुं सूर्यं प्रजापतिं चैताः प्रायश्चित्तदेवता आज्येन ज्ञाता
ज्ञातदोषनिर्हरणार्थं त्रिवारमग्निं मरुतश्चाज्यैर्विश्वान्देवान् संस्रावेण यक्ष्ये॥ अन

प्रायश्चित्ताज्याहुतीः सम्यग्जुहुयात्॥ तत्र मंत्राः॥ अयाश्चेति विमदो ऽयाऽलग्निः पङ्क्तिः॥
प्रायश्चित्ताज्यहोमे विनियोगः॥ अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्त्वमया ऽसि। श्री
अया सा वयसा हितो ऽया सन्हव्यमूहिषे अया नो धेहि भेषजं स्वाहा॥ इत्येकस्यत्याज्यं
जुहुयात्॥ अयसे ऽग्नय इदं न मम॥ अतो देवा मेधातिथिर्देवा गायत्री॥ विनियोगः
सर्वत्र प्रायश्चित्ते॥ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे॥ पृथिव्याः सप्त धाम
भिः॥ स्वाहा देवेभ्य इदं न मम॥ इदं विष्णुर्मेधातिथिर्देवा गायत्री॥ ॐ इदं विष्णुर्वि
क्र चमे त्रेधा निदधे पदं॥ समूल्हमस्य पांसुरे॥ स्वाहा विष्णव इदं न मम॥ व्यस्तस
मस्तव्याहृतीनां विश्वामित्रजमदग्निभरद्वाज प्रजापतयो ऽग्निर्वायुःसूर्य प्रजा
पतयो गायत्र्युष्णिगनुष्टुप्बृहत्यश्छंदांसि॥ प्रायश्चित्तार्थं व्याहृतिहोमं करि
ष्ये॥ ॐ भूः स्वाहा अग्नय इदं॥ ॐ भुवः स्वाहा वायव इदं॥ ॐ स्वः स्वाहा सूर्यायेदं॥

ॐभूर्भुवःस्वःस्वाहा॥प्रजापतयइदंनमम॥ततोब्रह्माकर्तारंपरित्यागंवाचयेद्दे
वतेति छंन्नेताएवसमाम्नाताहुतीर्जुहुयात्॥त्यागंयजमानोऽत्रकुर्यात्॥ततस्त
१०७ त्रस्थोब्रह्मैवमंत्रविपर्यासादिनियतनिमित्तेसकृत्॥यद्वोदेवाअभितपाम
रुतस्त्रिष्टुप्॥मंत्रविपर्यासादिनिमित्तकप्रायश्चित्ताज्यहोमेविनियोगः॥यद्वो
देवाअतिपातयानिवाचाचप्रयुतीदेवहेलनं॥अरायोऽस्माँअभिदुच्छुना
यतेन्यत्रास्मिन्॥मरुतस्तन्निधेतनस्वाहा॥यजमानः॥मरुद्भ्यःइदंनमम॥अ
नाज्ञातमितिमंत्रस्यहिरण्यगर्भऋषिस्त्रिष्टुप्॥ज्ञाताज्ञातदोषपरिहारा राम
र्थमाज्यहोमेविनियोगः॥अनाज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमिथु॥अग्नेतद
स्यकल्पयत्वंहिवेत्थयथातथंस्वाहा॥यजमानःअग्नयइदं०॥पुरुषसंमितो १०७
यज्ञोयज्ञःपुरुषसंमितः॥अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथंस्वाहा॥य

स्या जमानःअग्नयइदं०॥यत्पाकत्रेत्यस्यत्रितऋषिस्त्रिष्टुप्॥मंत्रविपर्यासादिनिमित्तकप्राय
श्चित्ताज्यहोमेविनियोगः॥यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्त्यासः
अग्निष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवाँऋतुशोयजातिस्वाहा॥यजमानःअ
ग्नयइदं०॥एकेनभिन्नाद्यनियतनिमित्तेसतिवक्ष्यमाणप्रकारेणतत्तत्प्रतिपदोक्त
जपहोमान्कुर्यात्ब्रह्मा॥ब्रह्मणोऽभावेयजमानएवैतान्प्रायश्चित्तादीन्होवाऽन्य
स्मैवरंदद्यात्॥ततोयजमानःसर्वकर्मप्रपूरिणींभद्रद्रव्यदांपूर्णाहुतिंजुहुयात्॥
तद्यथा॥स्रुवेणाज्यंगृहीत्वास्रुचंसमबिलंपूरयित्वातस्यांस्रुवंमूर्ध्वबिलंनिधायपु
नरधोबिलंनिक्षिप्यस्रुवाग्रेकुसुमाश्च।तान्निधायसव्यपाणिनास्रुक्स्रुमूलेधृत्वा
स्रुक् दक्षिणपाणिनास्रुवैग्रंखमुद्यागृहीत्वातिष्ठन्समपादऋजुकायः॥स्रुवायेन्यस्तदृ
ष्टिःप्रसन्नात्मासमुद्रादूर्मिरित्येकादशर्चस्यसूक्तस्यवामदेवऽआपस्त्रिष्टुप्॥अं

त्याजगती॥ पूर्णाहुतौ विनियोगः॥ समुद्रादूर्मिर्मधुमाँ उदारत्॥ मधुमंतं तदूर्मिं स्वाहे
१०८ तिपठन्नेवपरिमितं तथायं संनतं स्रुवाग्रेण सर्षपं हुत्वाअज्य इदं न मम मेरुं दिग्भ्यस्तको
विज्योतिषस्य स्पृतानोस्यषोग्निस्त्रिष्टुप्॥ विज्योतिषा बृहता भात्यग्नि रक्षसे विनि
ष्टस्वाहेत्यनेनचतथैवावशिष्टं हुत्वाग्नये इदं न मम मेति स्त्यक्त्वा॥ विश्वेभ्यो देवेभ्यः स्वा
हेतिसंस्त्रावं हुत्वा विश्वेभ्यो देवेभ्यः इदं न मम तत स्तंडुलकणान्स मिद्दर्भ शकलान्वि
प्रोक्ष्याग्नौ प्रहरेत्॥ पूर्णाहुत्याद्येतदंतं समूलं प्रयोगपारिजातकारेणलिखितमपिवृ
द्धानां शिष्टानकुर्वंति॥ अथावभृतस्थानीयं पूर्णपात्रजलेन मार्जनं कुर्यात्॥ तद्यथा॥ राम
पूर्वासादितं पूर्णपात्रमास्तीर्ण बर्हिषि दक्षिणपाणिना निधाय तत्र गंगादि पुण्यनदीस्म
रेत्॥ दक्षिणपाणिना स्पृशन्॥ पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः १०८
सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः अक्षितिरसि मा मे क्षेष्ठा॥ इति जपित्वा

कुशाग्रैः प्रागादि पंचदिक्षु जलं मंत्रैर्यथा लिंगं सिंचेत्॥ ते च मंत्राः॥ प्राच्यां दिशि
देवा ऋत्विजो मार्जयंतां दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां॥ प्रतीच्यां दिशि
गृहाः पशवो मार्जयंतां॥ उदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयंतां॥ ऊ
र्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयंतामित्येकश्रुत्या पठन्॥ प्रतिदिशं सि
क्त्वा कुशाग्रैः स्वशिरसि मार्जयेत्॥ तत्र मंत्राः॥ आपो अस्मानि त्यस्य देवश्रवाऽआ
पस्त्रिष्टुप्॥ मार्जने विनियोगः॥ आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः
पुनंतु॥ विश्वं हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरापूत एमि॥ इदमापः सिंधुद्वी
प आपोनुष्टुप्॥ मार्जने विनियोगः॥ इदमापः प्रवहत यत्किंच दुरितं मयि॥ य
द्वाहमभिदुद्रोह यद्वा शेप उतानृतं॥ सुमित्र्यान आप ओषधयः संतु॥ इत्येते
मंत्रैर्मार्जनं कृत्वा॥ दुर्मित्र्यास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्मस्तं हन्मीति नि

ऋ. इति दक्षिणकुक्षावरपः सिंचेत्॥ ततो ब्रह्मा यजमानवामपार्श्वस्थितपत्न्यंजलौ
पूर्णपात्रस्थं जलं॥ ओं माहं प्रजां परासिचं या नः सयावरीस्थन॥ समुद्रं वो नि
१०९ नयानि स्वं पाथो अपीथ॥ इति मंत्रमेकं श्रुत्यापत्न्या वाचयं स्वयं वा पठन्॥ प्रत्य
ङ्मुखं निषिच्यांजलिस्थितजलं पापनोदार्थं मा मानेपत्नी च प्रोक्षयेत्॥ प
त्नीतज्जलं बर्हिषि निषिंचेत्॥ अथवा यजमान एव स्ववामपाणाउत्ताने बर्हिःक्षि
पाणिना निधाय तत्र दक्षिणपाणौ पूर्णपात्रमादाय माहं प्रजामित्यनेन तज्जलं प्रत्यङ्मुखं
निषिच्य ता आपः समुद्रं गच्छंतीति ध्यात्वा पाणिस्थजलेन आत्मानं पत्नीं च प्रोक्ष राम
येत्॥ ततः कर्ता अग्नेर्वायव्यदेशे स्थितः संस्थाजपेनोपतिष्ठेत॥ तद्यथा॥ अग्ने १०९
त्वं नः इति चतसृणां गोपायना लोपायना वा बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधु
श्चैकर्चा ऋषयः अग्निर्देवता द्विपदा विराट्छंदः॥ अग्न्युपस्थाने विनियोगः॥

अग्ने त्वं नो अंतम उत त्राता शिवो भवा वरूथ्यः॥ वसुरग्निर्वसुश्रवा अच्छा नक्षि
द्युमत्तमं रयिं दाः॥ स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्॥ तं
त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः॥४॥ ओं च मे स्वरश्च मे यज्ञो
प च ते नमश्च॥ यत्ते न्यूनं तस्मै त उपयत्तोतिरिक्तं तस्मै ते नमः॥ स्वस्ति श्रद्धां मे
धां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलं॥ आयुष्यं तेज आरोग्यं देहि मे हव्यवाहौ॥ न
देहि मे हव्यवाहनोन मानमः॥ ततो ब्रह्मा पितरेवस्थिताएतैरेवोपतिष्ठेत॥ तत
तः कर्ता आचारात्॥ मानस्तोके कुत्सो रुद्रो जगती॥ विभूतिग्रहणे विनियोगः॥
मानस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः॥ वीरान्मा नो रुद्र
भामितो वधीर्हविष्मंतः सदमित्त्वा हवामहे॥ इति स्रुवबिलस्थेन विभूतिं गृही
त्वा॥ ॐ त्र्यायुषं जमदग्नेरिति ललाटे॥ कश्यपस्य त्र्यायुषमिति कंठे॥ अगस्त्यस्य त्र्या

युषमिति नाभौ ॥ यद्देवानां त्र्यायुषमिति दक्षिणस्कंधे ॥ तन्मे अस्तु त्र्यायुषमिति वा
मस्कंधे ॥ त्र्यायुषमिति वामः शिरसि धारयेत् ॥ केचिन्नोपस्थे नाप्यूर्ध्वविभूतिधार
११० णमाहुरिति ॥ ततः कर्मपरिस्तरणानि विसृज्याग्निं परिसमूह्य पर्युक्ष्य विश्वानि
गंध नद्रूत्यर्चयित्वा । नत्वा च पुष्पादिभिरलं कृत्य नैवेद्यतांबूलं च ब्राह्मणाय यथोक्तदक्षि निवेद्य
णाभावे हुतशेषं घृतादि सहिरण्यं दत्वा ब्रह्मणाभावेन्यस्मै ब्राह्मणाय दत्वा पात्रा
दे णि प्रक्षाल्य पूर्वक्रमेण द्दद्दप्राउत्सृज्य यस्य स्मृत्येति श्रीविष्णुं नत्वा आचम्य
घृतपवित्रग्रंथिं विसस्य गृहदेशे क्षिपेत् ॥ दर्शे तु ॥ अग्नीषोम स्थाने इंद्राग्नी इ ने राम
तर सर्व समानं तत्रादर्शितमेव सद्यस्कालायां पौर्णमास्याममावास्यायां चतु
मयत्रवायाग दिन एव प्रातर्होमानंतरमन्वाधायेध्माबर्हिषि संनद्येष्टिप्र ११०
योगं कुर्यात् ॥ इति श्रीमत् नारायणभट्टविरचिते प्रयोगरत्ने पार्वणस्थालीपा

कप्रयोगहोमसमाप्तः ॥ छ ॥ ॥ अथेष्टिप्रायश्चित्तानि ॥ प्रतिपद्यपि चेष्टायां य
दि विष्टः समापयेत् ॥ पुनः प्रणीय यक्षन्सेष्टिः कर्तव्या यागविरमैः ॥ प्रमादादन्य
स्मीचे स्वयं यजेत स्वादानी वन्याय जते चेत्तदा प्रायश्चित्तं पथिकृच्चरुहोमं कृत्वा
पुनस्तत्तीयादितिथिषु पुनरन्वाधानपूर्वकमिष्टिं कुर्यात् ॥ अथातिपन्नेष्टिप्रय
ग ॥ अन्वाधानात्पूर्वं चेत्तीरजलाभवतिन तदा पंचम्यादि दिवसे सद्यस्कालान्वाधा
ध्या नपूर्वकं जुहुयात् ॥ अन्वाधानात् परतो रजस्वला चेत्तांग्रहारेस्थापयित्वा प्रति
पद्यवत् जुहुयात् ॥ सूतकादिनेष्टिरतीता चेद्दागामिपर्वपूर्वतिथिषु द्वितीयां चतु
र्थीं नवमीं चतुर्दशीं च विहायान्यासु तामतिपन्नेष्टिं कुर्यात् ॥ नात्र प्रतिक्रमे अ
नंतरे पर्वणि पथिकृद्यागपूर्वकमतिपन्नयागं कृत्वा तत्पर्वणोन्वाधानं कुर्यात् ।
तत्राप्यतिक्रमे अतिपन्नस्य पादकृच्छ्रप्रायश्चित्तं कृत्वा प्रोक्तकाले प्रतिपदि

१११ ष्टिं सद्यस्कालान्वाधानपूर्वकं कुर्यात्॥ द्वितीयपर्वातिक्रमश्चेत्पूर्ववदागामिपर्व
मध्ये कुर्यात्॥ तत्राप्यतिक्रमे तत्स्थाणिपथिकृत्पूर्वं कार्यं॥ पथिकृदिष्टिं स्वतंत्रां प्रा
कृपूर्वेष्ट्या समानतंत्रं कुर्यात्॥ तस्याप्यतिक्रमे तृतीयप्रतिपदि अतिपन्नस्य
द्वयप्रायश्चित्तं हुत्वा पंचरात्रिद्वा प्राप्तकालामिष्टिं कुर्यात्॥ तस्याप्यतिक्रमे आ
गामिपर्वपर्यंतं पूर्वोक्तं कुर्यात्॥ तत्राप्यतिक्रमे समारोपितोग्निर्नष्ट इति तेन विधिना
पुनःसंधानं कृत्वा प्राप्तपर्वतिथिनेष्टिं कुर्यात्॥ अन्वाधानेष्टिमध्ये चंद्रग्रहणे चे
दिष्टिदिने हविषां सादनांतं कृत्वा अन्वाधानेष्टिमध्ये चंद्रग्रहणदोषप्रायश्चि राम
त्तार्थमाज्यहोमं करिष्ये॥ इति संकल्प्य॥ नवो नवो भवतीत्यस्य सूर्या सावित्री
चंद्रमास्त्रिष्टुप्॥ नवो नवो भवति जायमानो ह्नां केतुरुषसामेत्यग्रं॥ भागं देवेभ्यो १११
विदधात्यायन्प्रचंद्रमास्तिरते दीर्घमायुः॥ उद्यमादित्या अंशुमाप्यापयंति य

यमक्षितमक्षितयः पिबंति॥ तेन नो राजा वरुणो बृहस्पतिराप्याययंतु भुवनस्य
गोपाः॥ आभ्यां द्वे प्रकृताज्येनैताहुतीर्हुत्वा अभ्यलंकरणादितंत्रं कुर्यात्॥ सूर्यग्र
हणे मध्ये चेद्धविरासादनांते तिसृ आज्याहुतयः॥ तास्त्व॥ चित्रं देवानामित्यांगि
रसः कुत्सः सूर्यस्त्रिष्टुप्॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥
आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥ उदुत्यं जातवेद
समित्यस्य कण्वः प्रस्कण्वः सूर्यामुष्णिक्॥ उदुत्यं जातवेदसं देवं वहंति केतवः॥
दृशे विश्वाय सूर्यं॥ उदु त्यमित्यस्य कण्वः प्रस्कण्वः सूर्यो नुष्टुप्॥ उद्वयं तमसस्प
रिज्योतिष्पश्यंत उत्तरं॥ देवं देवत्रा सूर्यमगन्मज्योतिरुत्तमं॥ एता हुत्वा अभ्यलं
करणादितंत्रशेषं समापयेत्॥ इदं प्रयोगपारिजाते संग्रहोक्तं प्रायश्चित्तं ग्रंथांतरे
तु शौनकोक्तं उक्तं॥ तद्यथा॥ इष्टिदिने हविरासादनांते कृते अन्वाधानेष्टिमध्ये चंद्र

ग्रहणे जनित्रवैगुण्यपरिहारार्थं शांतिकोक्तमाज्याहुतिहोममुपस्थानं च करिष्य इति सं
कल्प्य॥ अत्राहगोरित्यस्य राहूगणो गोतम ऋषिः इंद्रो देवता गायत्री॥ इष्टिमध्ये चंद्रग्रह
णवैगुण्यपरिहारार्थमाज्यहोमे विनियोगः॥ ओं अत्राह गोरमन्वत नाम त्वष्टुरपी
च्यं॥ इत्था चंद्रमसो गृहे॥ स्वाहा॥ चंद्रमस इदं न मम॥ नवो नवो इत्यस्याः सूर्या सा
वित्री चंद्रमास्त्रिष्टुप्॥ चंद्रोपस्थाने विनियोगः॥ नवोनवो भवति०॥ दीर्घमायुः
सूर्यग्रहणे तु संकल्पादौ चंद्रोपस्थाने सूर्यपदं प्रयोक्तव्यं॥ उद्वयमित्यस्याः
काण्वः प्रस्कण्वः सूर्योनुष्टुप्॥ उद्वयं तमसस्परि०॥ स्वाहा सूर्यायेदं न मम॥ चि राम
त्रं देवानामित्यस्यांगीरसः कुत्सः सूर्यस्त्रिष्टुप्॥ सूर्योपस्थाने विनियोगः॥ चित्रं
देवानामुदगादनीकं चक्षुर्मित्रस्य०॥ इतीष्टिमध्ये ग्रहणे निर्णयः॥ ॥ अन्वा ११२
धानेष्टिमध्ये ऽग्न्यनुगतो अयाश्चेति मंत्रेण वक्ष्यमाणवत्॥ पुनःसंधानं कृत्वा॥

ॐ भूर्भुवः स्वः स्वाहेति मंत्रेण संकल्पपूर्वकं प्रायश्चित्तं संस्कृताज्येन हुत्वा पुनरन्वाधा
नमिष्टिं कुर्यात्॥ अन्वाधानेष्टिमध्ये प्रयाणोपस्थितौ तु कृप्यं ता अंगिरस्तमेति संकल्प
पूर्वकं संस्कृताज्यं हुत्वा अरण्यादिषु समारोप्य होमकाले प्रतिष्ठाप्य प्रातर्होमपूर्व
मिष्टिं कं कुर्यात्॥ अन्वाधाय प्रतिपदि प्रमादादिष्टयकरणे तृतीयादिषु प्रातरौपासनोत्त
रं संकल्पपूर्वकं संस्कृताज्यं व्यस्तसमस्तव्याहृतिभिर्हुत्वा पुनरन्वाधाय यागं कुर्या
त्॥ अथ प्रसंगादत्रैव नित्यनैमित्तिकप्रायश्चित्तान्युच्यंते॥ ग्राम्यापरिमितदर्शोद
र्वाग्बहिरायतनाद्गतश्चेदग्निः स च प्रायश्चित्तसमाप्तिपर्यंतं स्थितियोग्यस्तदा
इदं त एकं पर उ त एकं तृतीयेन ज्योतिषा संविशस्व॥ संवेशने तन्वे१ चारुरेधि
प्रियो देवानां परमे जनित्रे॥ इति मंत्रेणायतने प्रक्षिप्य व्याहृतिभिराज्याहुती
र्जुहुयात्॥ अत्र कारिका॥ अर्वाक्शम्यापरासात्तु बहिरायतनाद्गतं॥ प्रायश्चित्तस

११३ मास्यंते समर्थो जीवितु यदि ॥ इदं त इत्यृचा तस्य स्थाने ऽग्निं प्रक्षिपेत्पुनः ॥ आज्याहुति
श्चजुहुयाद्व्याहृत्या खिलं पूर्ववत् ॥ ग्राम्यायष्टृत्रिंशद्गुलेर्यापदसंबः ॥ भूम्या परि भि
न्नदेशाद्बहिरायतनाद्धुतेऽग्नौ पथिकृते ग्नये चरुं निर्वपेत् ॥ अग्नौ द्वादशगृहीतेन ना
ज्येन स्रुचं पूरयित्वा अग्नये पथिकृते स्वाहेति पूर्णाहुतिं जुहुयात् ॥ स्रुवाहुतिर्वा ॥
तदुक्तं कारिकायां ॥ अतिक्रान्तो यदा होम्याप्रासनेन लोपभवेत् ॥ चरुः पथिकृते कार्यः
पूर्णाहुतिरथापि वा ॥ पूर्णाहुतिलक्षणं कारिकायामुक्तं ॥ आज्यं द्वादशगृहीत्वा स्रुचिग् राम
हीत्वा पूरयेत्स्रुचं ॥ तया वा आज्याहुतिः कार्या सा पूर्णाहुतिरिष्यते ॥ स्रुवपूर्णाहुति
र्वोत्याद्विपलैकयाज्ञिका विदुः ॥ यद्यग्निः स्वयं प्रज्वलति तदा उद्दीप्यस्व जातवेदः
पघ्नन्निर्ऋतिं मम ॥ पशूंश्च मह्यमावह जीवनं च दिशो दश ॥ मा नो हिंसीज्जातवेदो ११३
गामश्वं पुरुषं जगत् ॥ अबिभ्रदग्न आगहि श्रिया मा परिपालय ॥ इति मंत्रा

भ्यां समिद्द्वयमग्नावादध्यात् ॥ अग्नेश्च मलमूत्राद्युपघाते ॥ पुनस्त्वादित्या
रुद्रा वसवः समिंधतां पुनर्ब्रह्माणो वसुनीथयज्ञैः ॥ घृतेन त्वं तन्वो वर्धयस्व
सत्याः सन्तु यजमानस्य कामाः इति समिधमादध्यात् ॥ तदुक्तं कारिकायां ॥ स्व
यं ज्वलं त्वेदुद्दीप्यस्वेति भ्यां द्वाभ्यां समिद्द्वयं ॥ आधेयमुपघाते तु पुनस्त्वेत्य
नया समित् ॥ हूयमानाहुतिर्यदि बहिः स्कन्देत्तदा देवाञ्जनमित्यनेन मंत्रेणाभिमृश्य
इदमस्य स्कन्दे द्वत्वाज्याहुतिं जुहुयाद्व्याहृतिभिश्च ॥ ततस्तज्जमनले क्षिपेत् ॥
मंत्रोऽयं ॥ देवाञ्जनमगन्यज्ञस्ततस्य मा पुष्टिरेव वर्धतां ॥ ततिघृतेन मुंचतु यज्ञो यज्ञ
पति मंहसस्पतये स्वाहा ॥ भुवनपतये स्वाहा ॥ भूतानां पतये स्वाहा ॥ यज्ञस्य
त्वा प्रथये ऽन्मयाभिमपाप्रतिमया ॥ इदस्य श्रं स्कंदं प्रथमां अनुघ निमिं च पानि
मनुयश्च पूर्वः ॥ समानं योनिमनुसंचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ अ

त्रकारिका॥ आहुतिर्हूयमाना तु बहिः स्कंदेत्तवे यदा॥ देवांजनमगन्यज्ञेत्यनेना
भिमंत्र्य तां॥ इत्संस्रव्याहुतिं हुत्वा प्रक्षिपेदनले पुनः॥ देवांजनेति सर्वत्रस्कन्नेऽत्व
११४ भिमर्शो विधिः॥ होतव्याऽन्याहुतिस्तत्र व्याहृत्याख्यैः समुच्चयात्॥ यागस्याग्न्य
न्वाधानान्निर्वापादिषु ज्ञातो देवताव्युत्क्रमो यदा ज्ञातस्तदा व्याहृतिभिर्हुत्वावि
हितदेवतां यजेत्॥ यागादूर्ध्वं देवताव्युत्क्रमज्ञाने तु व्याहृतिभिर्हुत्वा तं यागं ना
वर्त्तयेत्॥ यदा त्वप्रकृतां कांचिद्देवतां यजेत्तदा व्याहृतिभिर्हुत्वा प्रकृतदेवतायै
यागमावर्तयेत्॥ अत्र कारिका॥ प्राग्यागाद्व्युत्क्रमे ज्ञाते इदं हुत्वा यजेत्तदा॥ राम
त अविज्ञातो विपर्यासो विहितां देवतां स्मरन्॥ इष्टवांस्तत ऊर्ध्वं तु व्युत्क्रमावगमे
सति॥ प्रायश्चित्तमिदं कृत्वा यागं नावर्त्तयेत्तदा॥ यदा त्वविहितां कांचिद्देवता ११४
मिष्टवांस्तदा॥ प्रायश्चित्तमिदं कृत्वा यागेनावर्त्तयेत्कृतं॥ इदं व्याहृतिहोमा

ख्यं॥ अन्यान्यपि प्रायश्चित्तानि॥ कारिकायां॥ पवित्रं यदि नश्येच्चेत्स्यात्पवित्रव
ती चरुः॥ यदा हरपक्वं स्यात्तेनैव हविषा यजेत्॥ चतुःशरावमात्रं तु पचेद्व्रीहिभि
रोदनं॥ भोजयेत्तेन चान्नेन चतुरो ब्राह्मणानथ॥ बहुदुग्धमदुग्धं वा किंचिद्दे
वयदा हविः॥ शिष्टेनेष्ट्वा पुनर्यागः स्यादारभ्यादितस्तदा॥ हुतसेदग्धं यदात्त
स्यात्तु पुनरुत्सादयेद्विधिः॥ स एव यागः कर्तव्यः पुनर्यागस्कन्नेऽप्यति॥ मध्या
त्पूर्वार्धतो वात्र यदि दुष्टं हविर्भवेत्॥ तस्यैव हविषो वर्धन्मध्यात्पूर्वार्धतः
पुनः॥ इध्माधाने कृते दुष्टे प्रधानहविरन्नवत्॥ तत्स्थाने तु हुयादाज्यम
दुष्टं चेत्तु होस्यथ॥ एवं समाप्य यद्दुष्टं तदप्सु प्रक्षिपेत्पुनः॥ अन्वाधा
नादिको यागः पुनः कर्तव्य एव तु॥ प्रागिध्माधानतो दुष्टे प्रधानहविषि
त्वथ॥ तद्विधिः पुनरुत्पाद्य पूर्ववत्तत्समापयेत्॥ अंगानां चेद्यदि दुष्टं तद

११५ प्सु प्रक्षिपेत्पुनः॥ स्विष्टकृद्धविषो दोषः। आज्येनैव समापयेत्॥ प्रच्युते स्कन्न
खैः केशैः कीटैर्वा मध्यसे वितथितैः॥ वसासृक्शुक्रमज्जास्थिमूत्रविट्स्वेद
दूषकैः॥ श्लेष्माद्यैरपि बीभत्सैर्दुष्टानि स्युर्हवींषि चेत्॥ भिन्नानि वैवस्त्रिका
नि दुष्टानि स्युः क्षिपेज्जले॥ स्रुक्स्रुवादि घृतं तच्चान्यामाहुत्यन्तु यो हविः॥ वा
नस्पत्यानि भिन्नानि प्राग्दंडान्यनले क्षिपेत्॥ अन्यच्चाशु चिसं बंधं मृन्मयं
भिन्नमेव वा॥ भूमिर्भूमिं तु मंत्रेण प्रक्षिपेद्वृतजले॥ मंत्रः॥ भूमिर्भूमिमगा
न्माता मातरमप्यगात्॥ भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिपद्य राम
तामिति॥ संसृष्टे यस्य गृह्याग्निरन्यगृह्याग्निनादि॥ चरुर्विविच्य ये कार्ये यद्वा पू
र्णाहुतिर्भवेत्॥ अग्निगुणाभवेदस्तु विविचित्यादिको गुणः॥ चरुः क्षामायकर्तव्यो ११५
गृहदाहेषु वैषभवेत्॥ ग्रामाग्निना तु संसर्गं कुर्वति शुचये चरुं॥ पचनाग्नेस्तु सं

सर्गसंवर्गाय चरुर्भवेत्॥ वैद्युतेन तु संसर्गं कुर्याद्प्सुमते चरुं॥ प्रायश्चित्तं चरु
स्त्वा नेवा पूर्णाहुतिरिष्यते॥ पर्वण्यायश्चपाते न कुर्याद्दर्शमस्ते चरुं॥ पर्वणि व्र
तलोपे तु कुर्याद्व्रातपते चरुं॥ समानं तंत्रं कुर्वति पार्वणेन तु कर्मणा॥ अकृत्वाग्र
यणं श्रौयान्नवान्नं यस्तु वैतनः॥ वैश्वानराय कर्तव्यः चरुः पूर्णाहुतिस्तथा॥ द्वि
पद्यं दामुते तत्राप्येष चरुर्भवेत्॥ कपालनाशेप्येषस्यान्त श्रवणाकर्मनामनि॥
कपाले तद्वैदिन्नं प्रागेव श्रवणाद्यदि॥ तदा तत्रोक्तमंत्रेण कपालं संदधात्यथ॥
अभिन्नो घर्मदुत्साभ्यां मपांत्सर्प्सु क्षिपेदथ॥ तच्चेदशु विसं बध्यमाप्यामेव क्षि
पेज्जले॥ भिद्येद्यदि पुरोडाशो गत्वा द्वेदथवा यदि॥ किमु स्पर्शे तीति मंत्रेण बर्हिषे
निधायत्तु॥ अभिमंत्रयतेतं तु मा हिंसीरिति मंत्रतः॥ श्रूयते मतनष्टश्च यजमा
ने तु जीवति॥ अग्नये सुरभिमते चरुः पूर्णाहुतिस्तथा॥ अथयस्य वधूर्गौर्वा

११६

जनयेच्चेष्टमौतिनः ॥ समराह्यश्वं कुर्यात्पूर्णाहुतिमथापि वा ॥ समारूढ
समिन्नाग्नौ पुनराधेयमिष्यते ॥ श्रौतोत्क्रमविरोध्यन्यन्मध्येतु यतशस्त्रिदं
प्रायश्चित्तं विशेषस्य यत्र नोक्तो भवेद्विधिः ॥ होतव्यास्त्याहुति स्तत्र भूर्भुवः स्व
रिति हि तु ॥ निमित्तानंतरं सर्वं प्रायश्चित्तं भवेदिह ॥ प्रागेवात्माघतेदोषे आ
ज्यसंस्कारतो यदि ॥ प्रायश्चित्तं भवेदाज्यसंस्कारानंतरं तदा ॥ व्युत्क्रमादे
वतानां तु संकल्पादौ भवेद्यदि ॥ मंत्राणां व्युत्क्रमस्तद्वद्धोमादौ च तु भवेद्य
दि ॥ मध्यात्सर्वाधारतश्चेति व्युत्क्रमोस्य भवेद्यदि ॥ द्रव्याणां व्युत्क्रमस्याद्वे
त्तथापनिर्वापणादिषु ॥ यद्वो देवा ऋचा ब्रह्मा जुहुयात्स्रुवाहुतिं ॥ यन्मु
ख्यं स्वगृहे द्रव्यं होमकर्त्रे ददातितत् ॥ यजमानस्तु जुहुयात् ब्रह्माभावे स्रु
वाहुतिं ॥ कस्मैचिद् ब्राह्मणायास्मिन्पक्षे द्रव्यं ददातितत् ॥ होतव्येकाहुति

राम

११६

श्चात्वा ह्रत्वा रव्ये: समुच्चयात् ॥ सर्वत्रैवं प्रायश्चित्तं रूपं जपहोमं वा ब्रह्मैव कुर्या
त् जुहोति जपतीति प्रायश्चित्ते ब्रह्माणमिति सूत्रकृदुक्तेः ॥ तदभावे तु यजमा
नः समानन्यायत्वात् ॥ यत्र स्वकाले कर्माकरणनिमित्तप्रायश्चित्तमुक्तं ॥ तस्मि
न्प्रायश्चित्ते कृते ऽतीतं कर्म कार्यं न भवतिमिति भेदः ॥ तदुक्तं कारिकायां ॥ प्रा
यश्चित्ते कृते पश्चादतीतमपि कर्म वै ॥ कार्यमित्येके आचार्या नित्यं नेतु विप
श्चितः ॥ कर्मसमाप्तिसमये अंगलोपे ज्ञाते ॥ अज्ञातेवांगलोपे प्रजापति प्रा
यश्चित्तमाहुः ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्वि
ष्णोः संपूर्णं स्यादिति श्रुतिरिति एवमन्यान्यपि प्रायश्चित्तानि ग्रंथांतरतो ऽ
वगंतव्यानि ॥ ॥ इति श्री भट्टरामेश्वरसूनु ॰ ॥ प्रयोगरत्ने इष्टिप्रायश्चित्ते
नैमित्तिकप्रायश्चित्तानि ॥ ॥ छ ॥ ॥ अथ सकलकर्मसाधारपरिभाषा

तत्र कारिका॥ आज्यैकद्रव्यके होमे स्याच्चेदाज्यपरिग्रहः॥ स्यात्परिस्तरणं तत्र ब्र
ह्मकृतमिति स्थितिः॥ नोच्चारयति यत्राज्यपदं कर्मसु सूत्रकृत्॥ अनादिष्टा
११७ ज्यहोमेषु तत्र नित्या परिस्तृतिः॥ सर्वस्मिन्पाकयज्ञे तु आज्यभागौ कृताकृ
तौ॥ सर्वेषु पाकयज्ञेषु भवेद्ब्रह्मा कृताकृतः॥ धन्वंतरिमखे ब्रह्मा नित्यः शूल
गवे तथा॥ हुचे होमे कैश्चिन्नाम्ना कैश्चिन्मंत्रेण सूत्रकृत्॥ नामधेयं यत्र तत्रैष्ठं
हवनं नामधेयतः॥ नैकैकां च नूपश्चार्यं चोलादौ वाश्रितो यदा॥ तदाग्निरि
ह यस्याद्वै होतव्या इति हूतिरिष्यते॥ पात्रासादनरछातः आज्याधिश्रपणा राम
दिच॥ स्रुवादिमार्जनं चैव भारज्जुं प्रहरणं तथा॥ पूर्णपात्रं भवेन्नित्यं माज्य ११७
स्योत्पवनं तथा॥ इध्मानादेशा आज्यस्यादनुक्ते साधनस्रुवः॥ जपानुमंत्र
णामंत्रोपस्थानाभिमंत्रणं॥ मंत्राः यः कर्मकरणे गृह्यकर्मण्युपांशु षट्॥

इदं कार्यमनेनेति न क्वचिद्दृश्यते विधिः॥ लिंगादेवेदमर्थत्वं येषां ते मंत्रसंज्ञिताः॥
मंत्रांते कर्मकर्तव्यं मंत्रस्य करणत्वतः॥ कर्मादित्तो तु मंत्रस्याप्याहतिर्गृह्यकर्मणि॥
मंत्राकृ देवतानां तु तूष्णीमेवाय निर्वपेत्॥ चतुरश्चतुरो मुष्टीन्त्रोक्षणं च तथाभ
वेत्॥ सहैव श्रपयेत्तत्र नास्ति चुपरणं तथा॥ आदिष्टमंत्रहोमेषु सर्वत्रैवं प्रतीयता
मिति॥ कृताकृतं वैकल्पिकं॥ हुचेदिति गृह्यसूत्रकारः॥ केचिन्माहोममाह॥ य
था सावित्र्यैव ब्रह्मण इति केचिन्मंत्रेणाह यथा॥ अग्नेनय सुपथा रायेऽस्मानि
ति चूतस्तु भिरिति॥ यत्र तु न नामतो न वा मंत्रतो होम उच्यते॥ केवलं तद्धिता
दिना देवताविधानं॥ यथा प्राजापत्यस्य स्थालीपाकस्य हुत्वाग्न्याश्वरवद्
स्यादौ तत्र चतुर्थ्यंतेन देवतानाम्ना होम इत्यर्थः॥ अनेक इति यथा॥ आग्राय
णाश्वयुजीकर्मणि यदाश्वयुज्याक्रिया। तत्र तयोरेककालता॥ जपेति जपाद

११८

पुष्टसु यस्तृतीयो मंत्रस्तकस्य लक्षणमेतत्॥ लिंगादर्थप्रकाशसामय्यानू
ष्टद मर्थत्वं च तत्कार्यार्थत्वं॥ न तु मंत्रसामान्यलक्षणमिदं अव्याप्तिअतिव्या
प्त्यादिदोषापतेः॥ तस्माद्विशेषस्यैव मंत्रस्य लक्षणं॥ एवं च मंत्रशब्दो ह्यर्थ
सामान्यार्थो विशेषार्थश्चेति भगवानूयत्र यो यद्दृश्यते कर्मकर्तृरंगं न तूच्यते
दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः कुरः॥ यत्र दिङ्नियमो कौ जपहोमादि
कर्मसु॥ तिस्रस्तत्र दिशः शस्ता ऐंद्री सौम्यापराजिता॥ अपराजितो ऐशा
नी॥ आसीनः उर्ध्वः प्रह्वो वा नियमो यत्र नोच्यते॥ तदासीनेन कर्तव्यं न प्रह्वे
न न तिष्ठता॥ तथा॥ अनादेशे स्वयं कर्ता सर्वत्रर्त्विक् पुरोहिताः॥ प्राङ्मु
लता साधनानां प्राक्संस्थत्वं च कर्मणां॥ तथा॥ अविज्ञातस्वरा मंत्राः प्र
योक्तव्याः प्रयोक्तृभिः॥ एककस्यैव होमेषु विज्ञाताश्च विज्ञाताश्च विकल्पिताः

राम

११८

यस्मिन्मंत्रे न पठितः स्वाहाकारो भवेद्यदि॥ स्वाहांतेन प्रयोक्तव्यो होमे
षु प्रणवादिकः॥ यत्र स्वाहा स्वधा चं शब्दात्तत्रैवं होममिष्यते॥ ऋग्गंते तत्र
होतव्यं स्वाहाकारं पठेत्ततः॥ ज्ञानीयसत्स्वं चेमंत्रं तदन्यानुपदेशतः
ॐ भूर्भुवः स्वः श्च इति तिस्रो व्याहृतयो जपेत्॥ आशिष्य होमेतिसृणि श्च
तुर्थी स्यात्समाहितः॥ अथ प्रयोगमंत्राणां षड्विधं लक्षणं स्मृतं॥ जपा
नुमंत्रणाप्यायनाभिमंत्रणस्त्येव च॥ उपस्थाकर्मकरणोपडपां शुप्रयो
गतः॥ जपमुच्चारणं विद्यात्तु कृयार्थमपि दृद्भवेत्॥ अर्थतः कार्यलाभ
श्चदर्थएव कृतो भवेत्॥ मंत्रमुच्चारयन्नेव मंत्रार्थत्वेन संस्मरेत्॥ शो
षयंतन्मनाभूत्वा स्यादेतदनुमंत्रणं॥ एतदेवाभितं त्रस्य लक्षणं च

११०

स्नानादिकं ॥ अद्भिः संस्पर्शनाधिक्यात देवापायनं स्मृतं ॥ उपस्थानं त

दृवस्यास्मरणं तिरस्थानसंयुतं ॥ बाह्यं कर्मयदत्तेषु कर्मकाले क्रियेत यत् ॥

कर्मणः करणं तस्य विहितार्थप्रकाशनं ॥ मंत्रेण कृत्वा मंत्रोक्तं क्रियते कर्मयै

षु तु ॥ तथा ॥ आज्योपस्थमुपांशुस्यान्मध्यं स्याविवृत्तमेव च ॥ कृतोकृतं ब्रह्म

वरणं ब्रह्मायाज्यस्य संस्कृतिः ॥ संमार्गस्तु वदर्थोऽस्या आज्यस्यागोपरिस्त

तिः ॥ व्रीहीणामवघातश्च तंडुलेषु कृतो कृतः ॥ द्रवीभूतघृतस्यापि विलाप राम

नविधिस्तथेति ॥ अत्र विहितं कर्म पवित्रपाणिः कुर्वीत ॥ यदाह हारीतः ॥ ११०

जपहोमहराधेते असुरादिवनूपिणः ॥ पवित्रकं बिस्त्रं कुर्वीत कृत हस्त

स्य विद्रवंति दिग्गादश ॥ अत्रिः ॥ उभाभ्यामपि पाणिभ्यां विप्रैर्दर्भपवि

त्रके ॥ धारणीये प्रयत्नेन ब्रह्मग्रंथिसमन्विते ॥ ब्रह्मग्रंथिलक्षणं ॥ गरुड

पुराणे ॥ अस्त्यन्यो वैष्णवो मार्गो ब्रह्मग्रंथिविनिर्मितः ॥ सव्ये स दक्षिणे

हस्ये पवित्रमधिधीयते ॥ तद्ब्रह्मग्रंथिमत्प्रोक्तं पवित्रं वेदवेदिभिः ॥ पवित्र

कं तु रश्मिमुखप्रवेशो ब्रह्ममार्गतः ॥ पवित्रदर्भसंख्या च तत्रैव ॥ सप्तभिः कु

शपिंजूलैः कुर्याद् ब्रह्मपवित्रकं ॥ पंचभिः क्षत्रियस्यैवं चतुर्भिस्तु तथा विदः ॥

द्वाभ्यां शूद्रस्य विहितं मितरांतथैव च ॥ मार्कंडेयस्तु ॥ चतुर्भिर्दर्भपिंजूलै

र्ब्राह्मणस्य पवित्रकं ॥ एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं ॥ सर्वेषां वा भवे

द्वाभ्यां पवित्रं ग्रंथितं नवा ॥ त्रिभिस्तु शांतिके कार्ये पौष्टिके पंचभिस्तथा ॥

चतुर्भिरामिचारार्थं कुर्वन् कुर्यात् पवित्रकं ॥ हेमपवित्रं विशिष्य प्रशस्तमुक्तं

हेमाद्रौ ॥ अन्यानि च पवित्राणि कुशदूर्वात्मकानि च ॥ हेमात्मकपवित्रस्य द्वि

कांनाहुतिवेकलामिति॥ इध्मेनाहुतिप्रमाणभेदउक्तः॥ सिधांतशेखरे॥
कर्षप्रमाणमाज्यस्यामधुक्षीरंच तत्समं॥ तंडुलानां शुक्तिमात्रं पायसं प्रसृतिः
१२० समं॥ कर्षमात्राणि भक्ष्याणि लाजामुष्टिमिता मताः॥ अन्नं ग्राससमं ग्रा
साकं ग्रासार्धमात्रकं॥ मूलानां तु त्रिभागः स्यात्कंदानामष्टमांशकः॥ इक्षुः
पर्वप्रमाणं स्याद्दंगुलं द्वितयं लताः॥ प्रादेशमात्राः समिधो व्रीहीणां मुष्ट राम
िसमाः॥ तिलसर्षपकणादीनां मृगीमुद्राप्रमाणतः॥ पत्रपुष्पफलानां तु स्व
मानाहुतिरिष्यते॥ चंद्रश्रीखंडकस्तूरीकुंकुमागरुकर्दमाः॥ हरिमंथस १२०
माः प्रोक्ताः गुग्गुलुर्बदरीसमः॥ आहुतीनामिदं मानं कथितं वेददादिभिः॥
इति॥ हरिमंथश्चणकः॥ मृगीमुद्रालक्षणमुक्तं॥ तत्रैव स्यात्त्रिमुद्रा मृगीमु
द्राहंसीसमुखीफलप्रदेति॥ अरणिजन्यादेरग्नेरुत्तमादित्वमुक्तं॥ तत्रै

वउत्तमो ऽरणिजन्योग्निर्मध्यमे सूर्यकांतजः॥ उत्तमः श्रोत्रियागारा
न्मध्यमः स्वगृहादिजः॥ एतमग्निं ताम्रसौवर्णराजतादिपात्राभ्यां प्र
णयेत्॥ तथा चात्रिः॥ पात्रांतरेणापिहितं ताम्रपात्रादिके शुभे॥ अ
ग्निप्रणयनं कुर्याच्छरावे सद्दपि वा॥ आपस्तंबः॥ नाप्रोक्षितमिंध
नमग्नावादध्यात्॥ बर्हिरर्थकुशाभावे प्रतिनिधयः॥ स्मृत्यर्थसारे॥ बर्हि
काशमयं ग्राह्यं नलस्थं ते कुशा यदि॥ शारो वंशेच मूलवा श्वेतबालमुंजार्जुनेक्ष
वः॥ सुगंधितेर्जुनादारदूर्वाक्षीरद्रुमा अपि॥ यद्वा सर्वतृणेभ्यो पि ग्राह्यं बर्हि
र्यथोचितं॥ शुष्कमूलं कृष्णमूलं दुर्गंधितृणवर्जितं॥ शातातपः॥ समित्कु
शफलादीनि ब्राह्मण स्वयमाहरेत्॥ शूद्रानीतैः क्रियः॥ क्रीतैः कर्म कुर्वन्न्यज
त्वधः॥ विष्णुः॥ दर्भाः श्रावणमासस्य समं तोत्पाटिताः कुशाः॥ आयातयामा

लाजो पानियोज्याः सर्वकर्मसु॥ वर्षमितिविशेषः॥ कुशोत्पाटनमंत्रमाह॥ कश्यपः॥
वीदेशः॥ विमृश्य त्वा छित्वा पूर्वोत्तरामुखः॥ ओंकारेणैव मंत्रेण कुशान् स्पृष्ट्वा द्विजोत्त
१२१ मः॥ विरिंचिना सहोत्पन्न परमेष्ठिनिसर्गज॥ नुद पापानि सर्वाणि दर्भ स्वस्तिकरो
मम॥ इमं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः॥ हुंफट्कारेण दर्भान् सकृत्सकृच्छित्वा स
मुद्धरेत्॥ हारीतः॥ अच्छिन्नाग्रान् पवित्रांश्च समूलान् कोमलान् शुभान्॥ पितृदेव
द्विजार्थं हि समाहरेत् कुशान् द्विजः॥ रत्नहस्तानाह॥ मरीचिः॥ पालाशः खादिरो राम
श्वत्थः उदुमीव रउदुंबरः॥ आपामार्गार्कदूर्वाश्च॥ मासेनभस्यमावास्यां तस्यां
दर्भचिमोम्मः॥ अयातयामास्ते दर्भा नियोज्याः स्युः पुनः पुनः॥ गोभिलः॥ कुशमू १२१
ले स्थितो ब्रह्मा कुशमध्ये जनार्दनः॥ कुशाग्रे शंकरं विंद्यात्त्रयो देवा व्यवस्थिताः॥
हारीतः॥ चितौ दर्भाः पथि दर्भाः ये दर्भा यज्ञभूमिषु॥ स्तरणासनपिंडेषु षट् कुशा

न् परिवर्जयेत्॥ ब्रह्मयज्ञेषु ये दर्भा ये दर्भाः पितृतर्पणे॥ हता मूत्रपुरीषाभ्यां तेषां
त्यागो विधीयते॥ मार्कंडेयः॥ कुशपाणिः सदा तिष्ठेद्ब्राह्मणो दर्भवर्जितः॥ स
र्व नित्यं हेति पापानि मूलाग्नीमिवानलः॥ कुशाश्चैत्यपरे विदुः॥ दशद्वादशवा
गुल्यः समाः पंचदश स्मृताः॥ नात्वेगुष्टाः स्तवकश्वसा द्वाइ ध्या हात्तमाः॥ ब्रह्म
पुराणेपि॥ शमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भवाः॥ अश्वत्थोदुंबरौ बिल्वः च
न्दनः सरलस्तथा॥ सालश्च देवदारुश्च खदिरश्चैव यज्ञिया॥ दक्षिणे शिविम्न
षट्को महाभारते॥ वेदोपनिषदश्चैव सर्वकर्मसु दक्षिणे॥ सर्वत्रानु प्रचो
दिष्टा भूमिर्गवि बाधकौ चनौ॥ वेजयापः॥ शिवनेत्रोद्भवं यस्मात्तस्मात्तं स्थित
वल्लभं॥ अमंगलं तत् घोलेन देवकार्येषु वर्जितं॥ अन्यच्च॥ यज्ञोपवीते द्वेधा
र्यं श्रौतस्मार्तकर्मणि॥ तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते॥ द सदोपवी

तिनामाव्यंसदाबद्धशिखेनच॥ विशिखोव्युपवीतश्चयत्करोतिनतत्कृतमिति॥
१२२ अत्रपूर्वार्धेनसदाशिखाबंधस्यपुरुषार्थता॥ उत्तरार्धेनविपर्यायेनिंदाद्वारेणसशि
खासोपवीताभ्यांकर्तव्यंकर्मेतिकार्ततानात्कर्मार्थता॥ एवंचकर्मकालेशिखा
बंधोपवीताभावेकर्मांगलोपनिमित्तंपुरुषार्थलोपनिमित्तंचप्रायश्चित्तंद्व
यंभवति॥ दर्शपूर्णमासयोरिवान्वेतवदने॥ कर्मणोबहिस्तुपुरुषार्थलोपनि
मित्तमेकमेवेतिविवेकः॥ संग्रहे॥ प्रभुःप्रथमकल्पस्ययोऽनुकल्पेनवर्तते॥ राम
समाप्नोतिफलंतस्यपरत्रेतिश्रुतिस्मृतिः॥ बहुल्यंवास्वगृह्योक्तंयस्ययत्क
र्मचोदितं॥ तस्यतावतिशास्त्रार्थेकृतेसर्वःकृतोभवेत्॥ कर्मविशेषेऽग्नि १२२
नामानि॥ पावकोलौकिकोह्यग्निःप्रथमःसंप्रकीर्तितः॥ अग्निस्तुमारुतोना
मगर्भाधानेविधीयते॥ ततःपुंसवनेज्ञेयःपावमान्यस्तथैवच॥ सीमंतेमं

गलोनामप्रबलोजातकर्मणि॥ नाम्निवैपार्थिवोह्यग्निःप्राशनेतुशुचिःस्मृतः॥
सभ्योनामसचौलेतुव्रतादेशसमुद्भवः॥ गोदानेसूर्यनामाग्निर्विवाहेयोजको
मतः॥ आवसथ्येद्विजोज्ञेयोवैश्वदेवेतुरुक्मकः॥ प्रायश्चित्तेविटश्चैवपाकय
ज्ञेषुपावकः॥ देवानांहव्यवाहश्चपितृणांकव्यवाहनः॥ शांतिकेवरदःप्रोक्तःपौ
ष्टिकेबलवर्धनः॥ पूर्णाहुत्यांमृडोनामक्रोधोग्निश्चाभिचारिके॥ वश्यार्थेका
मदोनामवनदाहेतुदूषकः॥ कुक्षौतुजाठरोज्ञेयःक्रव्यादोमृतदाहने॥ व
ह्निर्नामालक्षहोमेकोटिहोमेहुताशनः॥ समुद्रेवाडवोह्यग्निःक्षयेसंवर्तक
स्तथा॥ ब्रह्मावैगार्हपत्यस्यादीश्वरोदक्षिणस्तथा॥ विष्णुराहवनीयस्यात्
अग्निहोत्रेत्रयोग्नयः॥ ज्ञात्वैवमग्निनामानिगृह्यकर्मसमाचरेत्॥ स्वस्थैर्यसा
रि॥ बहुशुष्कैंधनेनाग्नौसुसमिद्धेविधूमके॥ सांगारेलेलिहानेचहोतव्यंनान्य

याह्वकचित॥ स्रुवः स्रुगादिप्रकृति वृक्षाः स्मृत्यर्थसारे॥ जुहूः पालाशी उपभृदाश्वत्थी
वैकंकती ध्रुवा॥ यद्वा सर्वाः स्रुचः कार्याः एतेषामन्यवृक्षजाः॥ ग्रामीमयाः स्रुवः का-
१२३ र्याः सर्वाभिर्भूर्जवृक्षाः॥ तदभावे यथालाभमन्ययज्ञीयवृक्षजाः॥ खादिरः स्फ्यस्स्रु-
क् कार्यः शम्याप्राशित्रमेक्षणं॥ खादिरो मुसलः कार्यः पालाशः स्यादुलूखलः॥ यि-
द्वामो वारणो कार्यो तदभावेन्यवृक्षजौ॥ मुख्याभावे तु सदृशं द्रव्यं प्रतिनिधी-
यते॥ यावद्वा वस्तु सदृशं तत्तदेव हि गृह्यते॥ संग्रहे॥ प्रणीतापूर्णपात्रयोर्दा-
रु कांस्यमयामरे॥ खादिरेण स्रुवः कार्यः पालाशेन जुहूर्भवेत्॥ त्वक्सारेदशवि- राम
लोस्यान्तां मन्ये वा यज्ञिये द्रुमे॥ तदभावे पलाशस्य पर्णाभ्यां हूयते हविः॥ प-
लाशपर्णाभावे तु पर्णैर्वा पिप्पलोद्भवैः॥ पर्णपात्रं मध्यमं॥ मध्यमेन पर्णेन जुहो- १२३
तीति श्रुतेः॥ चमसं वा प्रणीतायाः कांस्यपात्रमथापि वा॥ घटनाप्रकारः संग्रहे॥

आयामं पंचधा कृत्वा द्विभागं पात्रमुच्यते॥ त्रिभागं दण्डमित्याहुस्तदाहायामल-
क्षणं॥ पात्रायामोऽर्धतः पात्रविस्तारश्च तदर्धतः॥ ग्रीवाविस्तारस्तथा स्याद्धि-
द्विलस्य छुग्रमरूप्यते॥ विस्तारद्विगुणं पात्रं ग्रीवाविस्तारमर्धतः॥ अन्यानि त-
लक्षणानि विस्तारभयेन नोक्तानि॥ तथा॥ काम्ये प्रतिनिधिर्नास्ति नित्ये नैमि-
त्तिके च सः॥ काम्येष्वप्युपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः॥ न स्यात्प्रतिनिधिर्मन्त्र-
स्वामिदेवाग्निकर्मसु॥ स देशः कालयोर्नास्ति नारणेरग्निरेव सः॥ नाभाव-
स्य प्रतिनिधिरभावोत्तरमिष्यते॥ नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचि-
त्॥ इत्यादि तथा॥ स कालादुत्तरो गौणः कालः सर्वस्य कर्मणः॥ तथा॥ कुशाद-
र्व्यादियोमेत्रा ब्रह्मणश्च बर्हिष्कृताः॥ तेन निर्माल्यतां याति विनियोज्याः पु-
नः पुनः॥ कुशाः षट्सु तु निर्माल्या दद्याद्यावदभिचारके॥ मंत्रास्तत्रेव च

द्वार्थं ब्राह्मणाः प्रेतभोजिनः॥ षट्सु तर्पणश्राद्धास्नानभोजनमूत्रपुरीषकालधा
रणेषु॥ तत्राभिचारिके॥ कृतं कर्म विहितं कर्म विष्णवर्पणं कार्यं॥ तथा च बृहन्ना
१२४ रदीये॥ विष्णवर्पितानि कर्माणि सफलानि भवंति हि॥ अनर्पितानि कर्माणि
भस्मनि न्यस्तहव्यवत्॥ नित्यनैमित्तिके काम्ये यच्चान्यन्मोक्षसाधनं॥ विष्
ष्णोः समर्पितं सर्वं सात्विकं सफलं भवेत्॥ गीतायां॥ यत्करोषि यदश्नासि
यज्जुहोषि ददासि यत्॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं॥ मिति विहित
मिति विशेषः॥ इत्यादि॥ एवमन्या अपि परिभाषा ज्ञेयाः॥ ॥छ॥ इति श्री राम
॥ प्रयोगरत्ने परिभाषाप्रकरणं॥ छ॥ अथ गर्भाधानाद्याः संस्कारा उच्यंते॥
॥ ॥छ॥ ॥ तत्र प्रथमरजोदर्शने मासादौ दुष्टे सति गर्भाधानस्य शांतिपू १२४
र्वकं कर्तव्यत्वात्॥ शांतिकं वक्तुं दुष्टकालाद्युच्यते॥ प्रथमरजसि चैत्रज्येष्ठ

षाढभाद्रपदकार्तिकपौषा अशुभाः॥ आश्विनो मध्यमः॥ शेषाः शुभाः॥ केचिद्वैशाख
फाल्गुनपूर्वार्धयोरधमत्वमूचुः॥ तिथिषु प्रतिपच्चतुर्थीषष्ठ्यष्टमीद्वादशीचतुर्दशी
पौर्णमास्यमावास्या अशुभाः॥ शेषाः शुभाः॥ केचित्सप्तम्येकादश्यावशुभे अष्ट
मीद्वादश्यौ शुभे इत्यूचुः॥ वारेषु रविभौममंदवारा अशुभाः॥ अन्ये शुभाः॥ केचि
त्सोमाप्यशुभमूचुः॥ नक्षत्रेषु भरण्यार्द्रापुष्याश्लेषापूर्वाज्येष्ठामूलपूर्वाषाढा
पूर्वाभाद्रपदारेवत्यः अशुभाः॥ चित्राविशाखाश्रवणाश्विनीमघास्वातयो मध्य
माः॥ अन्यानि शुभानि॥ केचित्कृत्तिकापुनर्व[illegible]नुराधारेवत्याप्यशुभाः इत्यूचुः।
एवं च तासां मध्यमं॥ एवमन्यत्रापि॥ योगेषु व्याघातस्याद्यानव नाड्यो गंडाति
गंडयोः षट् षट् शूलस्य पंचदश परिघपूर्वार्धं वैधृतिव्यतीपातश्चेत्यशुभाः॥
वज्रं मध्यमं॥ अन्ये शुभाः॥ करणानि विष्टिं विना सर्वाणि शुभानि अन्यच्च तेषां

निशिके त्र्याद्यो भागः शुभः॥ द्वितीयो मध्यमः॥ तृतीयो दुष्टः॥ एवं रात्रौ॥ सूर्योदयास्त
१२५ मयावशुभौ॥ रविसंक्रमणादधो नाडिचतुष्टयमूर्ध्वं चात्यशुभं॥ संक्रांत्यां दग्धदि
नेषु शुभं॥ रविचंद्रोपरागयोरप्यशुभं॥ संध्यापर्वशावाशौचेषु मत्तुरीमनश्च
तुर्थाष्टमद्वादशस्थे चंद्रे जीर्णरक्तनीलमलिनवस्त्रेषु परिहितेषु न शुभं॥
संमार्जनीकाष्ठतृणाग्निशूर्पतुषशुष्ककाष्ठलोहपाषाणशस्त्रादिधारिण्याः
तौ पुष्पे दर्शनाशुभं॥ देहलीद्वाररथ्यापितृमातृगृहेष्वशुभं॥ ऊर्ध्वस्थितायानि
द्रितायाश्चाशुभं॥ पित्रादिसंखिन्नकृत्यनिर्दिष्टमशुभं॥ शय्यादौ शुभं इत्यादि ज्ञे राम
यं॥ दुष्टमासादौ प्रथमरजोदर्शने तांबूलभक्षणादिमंगलाचारं न कुर्यात्॥ द्वि
तीये तु शुभे तत्र कुर्यादिति केचित्॥ प्रथमरजोदर्शने द्वितीयं पतनं दृश्यते तस्मिन्न १२५
प्यशुभे विस्तरेण शांतिं कुर्यादित्यपि केचित्॥ प्रथम एव यथाशक्ति शांतिं चरे

दृश्यते॥ अत्रैकस्मिन्नप्यशुभे वक्ष्यमाणा शांतिः कार्या॥ द्वित्राद्यशुभसन्निपाते तु त
त्सूचितबहुलाशुभनिरासार्थं वक्ष्यमाणाहुतिसंख्याद्विवृद्ध्या कार्यं यथाशक्तीत्या
दि ज्ञेयं॥ इति शुभाशुभविचारः॥ अथ शांतिरुच्यते॥ तत्र एवं विनायकं पूज्य ग्रहांश्चै
व विधानतः॥ कर्मणां फलमाप्नोतीति याज्ञवल्क्येन कर्मफलसिद्धावविघ्नार्थत्वेन
ग्रहयज्ञस्यावश्यकोक्तेरिह च शौनकेन आर्तवानां तु नारीणां शांतिं वक्ष्यामि॥
शौनकेनोक्त्युपक्रम्य ग्रहातिथ्यपुरःसरमिति प्रकरणोक्तेरावश्यकत्वादेकदेशका
लकर्तृणां च विशेषवचनाभावे तंत्रेण कर्तव्यत्वात् ग्रहमखपूर्वकप्रयोग उच्यते॥
रजोदर्शनानंतरपंचमादिदिने चंद्रताराद्यानुकूल्ये शुचिदेशे सुस्नातया पत्न्या
युतः पतिः प्राङ्मुख उपविश्य प्राणानायम्य देशकालौ संकीर्त्य मम पत्न्याः प्रथम
रजोदर्शने अमुकदुष्टमासादिसूचितसकलारिष्टनिरसनद्वारा श्रीपरमेश्व

रप्रीत्यर्थं सगृहमखं शौनकोक्तां शांतिं करिष्य इति संकल्प्य॥ गणेशपूजनपुण्या
हवाचनगौर्यादिषोडशमातृकापूजनब्राह्म्यादिसप्तमातृकापूजननांदीश्रा
१२६ द्धानि। कृत्वा शांतं दांतं कुटुंबिनं मेत्र तत्र कर्माचार्यं ब्राह्मणं च जपहोमार्थम
ष्टौ चतुरो वा ऋत्विजोपि वृत्वा गंधादिना पूजयेत्॥ ततः आचार्यो गृहेशान
दिग्भागे भूमौ महीद्यौरिति भूमिं स्पृष्ट्वा महीद्यौः पृथिवी च न इमं यज्ञं मिमिक्ष
तां॥ पिपृतान्नो भरीमभिः॥ ओषधयः समिति द्रोणप्रमाणं तद्दक्षिणोत्तरम
क्षतयैव भूमिं स्पृष्ट्वा व्रीहिभिर्मध्ये तद्दक्षिणोत्तरं तेष्वस्पृष्टदेशे ओषधयः राम
संवदंते सोमेन सह राज्ञा॥ यस्मै कृणोति ब्राह्मणस्तं राजं पारयामसि॥ इ
ति मंत्रावृत्त्या राशित्रयं कृत्वा तेनैव क्रमेण राशित्रये नवमकलशं मंत्रमंत्रं कु १२६
मत्र यमाकलशोधिति मंत्रावृत्त्या स्थापयेत्॥ आकलशेषु धावति श्येनो व

र्म विगाहते॥ अभिद्रोणा कनिक्रदत्॥ एवं सर्वत्र मंत्रावृत्तिः॥ ततः प्रसुव आपइ
ति नव चर्चस्य सूक्तस्य सिंधुक्षित्प्रियमेधो जगती॥ कलशेषूदकपूरणे विनियो
गः॥ प्रसुव आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः॥ प्रसप्तसप्त
त्रेधा हि चक्रमुः प्रसृत्वरीणामति सिंधुरोजसा॥ प्रतेरदद्वरुणो यातवे पथः सि
धोयद्वाजां अभ्यद्रवस्त्वं॥ भूम्या अधि प्रवता यासि सानुना यदेषामग्रं जगता
मिरज्यसि॥ दिवि स्वनो यतते भूम्योपर्यनंतं शुष्ममुदियर्ति भानुना॥ अ
भ्रादिव प्रस्तनयंति वृष्टयः सिंधुर्यदेति वृषभो न रोरुवत्॥ अभि त्वा सिंधो शि
शुमिन्न मातरो वाश्रा अर्षंति पयसेव धेनवः॥ राजेव युध्वा नयसि त्वमित्सिचौ य
दासामग्रं प्रवतामिनक्षसि॥ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता
परुष्ण्या॥ असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया॥ तृ

ष्टाभयाप्रथमंयातवेसजूःसुसर्त्वासिरेयाश्वेत्यात्या॥त्वंसिंधोकुभयागोमतींक्रु
मुमेहत्न्वेवासरथंयाभिरीयसे॥ऋजीत्येनीरुशतीमहित्वापरिज्रयांसिभ
१२७ रजांसि॥अदब्धासिंधुरपसामपस्तमाश्वानचित्रावपुषीवदर्शता॥स्वश्वासिं
धुसुरथासुवासाहिरण्ययीसुकृतावाजिनीवती॥ऊर्णावतीयुवतिःसीलमा
वत्युताधिवस्तेसुभगामधुवृधं॥सुखंरथंयुयुजेसिंधुरश्विनंतेनवाजंस
निषदस्मिन्नाजौ॥महान्ह्यस्यमहिमापनस्यतेदब्धस्यस्वयशसोविरप्शिनः
॥१॥याःप्रवतइत्यस्यवसिष्ठआनघःशक्करी॥उदकपूरणेविनियोगः॥याःप्र राम
वतोनिवतउद्वतउदन्वतीरनुदकाश्चयाः॥ताअस्मभ्यंपयसापिन्वमा
नाःशिवादेवीरशिपदाभवंतुसर्वानद्योअशिमिदाभवंतु॥एवमन्त्रेपित्त १२७
त्तंचविनियोज्यं॥गंधद्वारामितित्रिष्टुप्॥गंधं॥प्रशस्ति॥याओषधी

रितिसर्वौषधीः॥ओषधयःसामितियवानुक्षिपेत्॥ततोमध्येकुंभेयवव्रीहि
माषःतिलप्रियंगुश्यामाकमुद्गान्क्षिप्वान्यग्रोधउदुंबरःकुमाःदूर्वारक्तोत्प
लचंपकबिल्वत्वेविष्णुक्रांतातुलसीबर्हिषःशंखपुष्पीशतावरीअश्वगंधाः
निर्गुंडीरक्तपीतसर्षपअपामार्ग॥पलाशपनसजीरकप्रियंगुकोभूमव्रीहि
श्वस्थःदधिदुग्धघृतपद्मपत्रनीलोत्पलसितपीतरक्तकुरंटकगुंजावचा
मदुकेमुस्तास्थानिद्वात्रिंशदौषधानिसर्वाणियथासंभावंवाक्षिपेत्॥त
तःत्रिषुकलशेषुकांडात्कांडादितिदूर्वा॥कांडात्कांडात्प्ररोहंतिपरुषः
पुरुषःपरि॥एवानोदूर्वेप्रतनुसहस्रेणशतेनच॥अश्वत्थेवइतिपंचपल्लवान्॥
अश्वत्थेवइतिअस्यायवगणोओषधयोनुष्टुप्॥अश्वत्थेवोनिषदनंपर्णेवो
वसतिष्कृता॥गोभाजइत्किलासथयत्सनवथपूरुषः॥भगजाश्वस्थाननान्या

वाल्मीकसंगमहृदगोष्ठस्थामदः॥ स्योना पृथिवीति हित्वा स्योना पृथिवि मेधा
तिथिर्मेधिर्गायत्री॥ स्योना पृथिवि भवा नृक्षरा निवेशनी। यच्छा नः शर्म स
१२८ प्रथः॥ याः फलिनीरिति पूगीफलानि॥ याः फलिनीरित्यस्याथर्वणो भिषकृगोधया
नुष्टुप्॥ याः फलिनीर्या॥ त्वंहस॥ स हिरत्नानीति कनककुलीशनीलपद्मराग
मौक्तिकानि पंचरत्नानि॥ स हिरत्ना[illegible]नीत्यस्य श्यावाश्वः सविता गायत्री॥
सुवाति स हिरत्नानि दाशुषे सुवाति सविता भगः॥ तं भागं चित्रमीमहे॥ हिरण्यरूप इति हिर
ण्यं क्षिपेत्॥ हिरण्यरूप इत्यस्य गृत्समद अपांनपा देवता त्रिष्टुप्॥ हिरण्यरूपः
स हिरण्यसंदृगपांनपा सेदु हिरण्यवर्णः॥ हिरण्ययात्परि योनेर्निषद्या हि
रण्यदा ददत्यन्नमस्मै॥ युवासुवास इति सूत्रेण वाससा च कलशकंठान्वेष्टयि १२८
त्वा॥ युवासुवासा इत्यस्य विश्वामित्रो यूप त्रिष्टुप्॥ युवा सुवासाः परिवीत आ

गात्स उ श्रेयान्भवति जायमानः॥ तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देव
यंतः॥ गंधाक्षतपुष्पमाल्यादिभिः कलशान्पूजयेत्॥ ततः कलशत्रयोपरितेने
व क्रमेण सौवर्णरजतकांस्यमयं ताम्रमयं वैणवं मृन्मयं वा यवादिपूरितपात्रत्रयं
पूर्णदर्वीति निधाय॥ पूर्णदर्वि परापत॥ शतक्रतो॥ तदुपरि श्वेतवस्त्रत्रयं न्यस्य
तत्र चंदनादिना अष्टदलानि कुर्यात्॥ तत्र मध्यमे॥ गायत्र्या विश्वामित्रो भुवनेश्व
री गायत्री॥ भुवनेश्वर्या वाहने विनियोगः॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धी
महि धियो यो नः प्रचोदयात्॥ भुवनेश्वरीमावाहयामीति यथाशक्ति सुवर्णनिर्मि
तां भुवनेश्वरी प्रतिमामग्न्युत्तारणपूर्वं स्थापयेत्॥ तद्दक्षिणकुंभोपरि वस्त्रे इंद्रा
षा कपिरिंद्राणी पंक्तिः॥ इंद्राण्या वाहने विनियोगः॥ इंद्राणीमासु नारिषु सु
भगामहमश्रवं॥ न ह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिंद्र उत्तरः॥

इंद्राणीमावाहयामिति थैव सौवर्णमिंद्राणीप्रतिमां संस्थाप्य तत्र कलशोपरि इंद्रं त्वा
१२९ विश्वामित्रऋ इंद्रो गायत्री॥ इंद्रावाहने विनियोगः॥ इंद्रं त्वा वृषभं वयं सुते सोमे हवा
महे॥ स पाहि मध्वो अंधसः॥ इंद्रमावाहयामीति सौवर्णमिंद्रप्रतिमां स्थापये
त्॥ ततस्तत्तन्मंत्रैरुक्तक्रमेण देवत्रयस्य कांडानुसमयेन षोडशोपचारपूजां कुर्यात्॥
ततो मध्यकुंभे आचार्येण सह सहस्रमष्टोत्तरं वा गायत्रीजप्त्वा श्रीसूक्तं जपेत्॥ तद्यथा॥
तत्सवितुर्विश्वामित्रः सविता गायत्री॥ जपे विनियोगः॥ तत्सवितुर्वरेण्यं भर्गो देव
स्य धीमहि॥ धियो यो नः प्रचोदयात्॥ हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य कर्द
मानंदचिक्लीतेंदिरासुता ऋषयः॥ श्रीर्देवता॥ आद्यास्तिस्रोनुष्टुभः ततः एका प्रस्ता
रपंक्तिः ततो द्वे त्रिष्टुभौ ततोष्टावनुष्टुभोंत्या प्रस्तारपंक्तिः॥ जपे विनियोगः॥ हिर १२९
ण्यवर्णां हरिणीं सुवर्णरजतस्रजां॥ चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो मम आवह॥ तां
म आवह जातवेदो लक्ष्मीमनपगामिनीं॥ यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहं॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीं॥ श्रियं देवीमुपह्वये श्रीर्मा देवी जुषतां॥
कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीं॥ पद्मे स्थितां पद्मवर्णां ता
मिहोपह्वये श्रियं॥ चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदारां॥ तां
पद्मनेमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे॥ आदित्यवर्णे तपसोधि
जातो वनस्पतिस्तव वृक्षोथ बिल्वः॥ तस्य फलानि तपसा नुदंतु मायांतरा या
श्च बाह्या अलक्ष्मीः॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह॥ प्रादुर्भूतोस्मि रा
ष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं॥
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषि
णीं॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं॥ मनसः काममाकूतिं वाचः सत्य
मशीमहि॥ पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ कर्दमेन प्रजाभूता
मयि संभव कर्दम॥ श्रियं वासय मे कुले मातरं पद्ममालिनीं॥ आपः सृजंतु

क्षिमथा निःच कर्दमातुवसमगृहे ॥ निजदेवीं मातरं श्रि पंमासयमेकुले ॥ आर्द्रां पुष्करिणीं पु
१२९ ष्टीं सुवर्णां हेममालिनीं ॥ सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म मावह ॥ आर्द्रां यः करिणीं
यष्टीं पिंगलां पद्ममालिनीं ॥ चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ तां म ऽआव
ह जातवेदो लक्ष्मीमनपगामिनीं ॥ यस्यां हिरण्यं प्रभूतं गावो दास्यो श्वान्विंदेयं पुरु
षानहं ॥ ततः एकैकं कुंदशिलाकुंभे रुद्रसूक्तानि जपेत् ॥ यथा ॥ कद्रुद्राय प्रचेतस इति नव
र्चस्य सूक्तस्य घोरः काण्वो रुद्रो गायत्री ॥ जपे विनियोगः ॥ कद्रुद्राय प्रचेतसे मीळ्हुष्ट
माय तव्यसे ॥ वोचेम शंतमं हृदे ॥ ० ॥ आपूषणीः सामवेदः ॥ इमा रुद्राय तवसे ऽइ
त्यकादशर्चस्य कुत्सो रुद्र आद्यानवमा जगत्यो त्यपद्वे अनुष्टुभौ ॥ जपे वि० ॥ इमा रुद्रा
य तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ॥ ० ॥ तन्नो मित्रो वरुणो मामहंताम १३०
दितिः सिंधुः पृथिवी उत द्यौः ॥ ११ ॥ आ ते पितरिति पंचदशर्चस्य सूक्तस्य गृत्समदो

रुद्रस्त्रिष्टुप् ॥ जपे विनि० ॥ आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः ॥ ० ॥
हवनश्रुन्नो रुद्रेह वोचः बृहद्वदेम विदथे सुवीराः ॥ १५ ॥ इमा रुद्राय स्थिरधन्वनेति द्वे
चतसृणां वसिष्ठो रुद्रस्तिस्रो जगत्यो त्या त्रिष्टुप् ॥ जपे विनि० ॥ इमा रुद्राय स्थिरधन्वने
गिरः क्षिप्रेषवे देवाय स्वधाव्ने ॥ यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥ आ वो राजानमिति वामदे
वो रुद्रस्त्रिष्टुप् ॥ जपे विनि० ॥ आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ॥
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वं ॥ १ ॥ तमुष्टुहि भौमोत्री रुद्र
स्त्रिष्टुप् ॥ जपे विनि० ॥ तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ॥ यक्ष्वा
महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥ १ ॥ भुवनस्य पितरं ऋजिश्वा रुद्रस्त्रि
ष्टुप् ॥ जपे विनि० ॥ भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ ॥ बृहंतमृ
ष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः ॥ १ ॥ त्र्यंबकं वसिष्ठो रुद्रस्त्रिष्टुप् ॥ जपे वि०
त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं ॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥

अथान्यत् स्त्रिगुतरकुंभेएकादशावृत्तिभिः रुद्रं जपेत्॥ तत्रादौ न्याहृत्वा॥ ऋष्यादीन् स्मरेत्॥
१३१ प्यां॥ नमकानां प्रथमानुवाके आद्यायाः कश्यपः द्वितीयाया आत्रेयः तृतीयायाः कश्यपः ततो
द्वयोर्गौतमस्ततएकस्याः कण्वस्ततो द्वयोर्मरुत्वांस्ततएकस्या भगवांस्ततस्तिसृणां नारद
स्ततस्तिसृणां भगवान्॥ द्वितीयानुवाकस्य मंडूकः तृतीयानुवाकस्य भगवान् चतुर्था
नुवाकस्य दूर्वासाः पंचमषष्ठानुवाकयोर्भगवान्॥ सप्तानुवाकस्य हेमकोशोऽष्टमानु
वाकस्य नवमोनुवाके च नमो वरुत्रिं यावत् भगवान् वशिष्ठस्यात्रिः दशमानुवाके प्रथ
मस्य पुलहो द्वितीयस्य स्कंदस्ततो द्वयोर्मंडव्यस्ततएकस्य देवराट् ततएकस्य भगवान्
ततएकस्यात्रिस्ततएकस्य वैश्यायनस्ततएकस्य भगवान्स्ततएकस्य वैराजस्ततएकस्य
पुलहस्ततएकस्य नारदस्ततएकादशानुवाके आद्यानां चतुर्णां दूर्वासास्तत आसमा १३१
प्तेर्वलऋषयः॥ प्रथमानुवाके आद्यस्य रुद्रस्ततएकस्य शंभुस्ततएकस्य स्कं
दात्मा रुद्रस्ततो द्वयो रुद्रस्ततएकस्य शंभुस्ततो द्वयोरादित्यात्मा रुद्रस्ततएकस्य शं

भुस्ततस्तिसृणां रुद्रस्ततस्तिसृणां भगवांस्ततो द्वितीयातृतीयानुवाकयो रुद्रश्चतुर्थपंचम
षष्ठानुवाकानां शंभुः सप्तमानुवाकस्य रुद्रोऽष्टमानुवाकस्य नमो वः किरिकेभ्य इत्यन्तस्य
रुद्र नवमस्य भगवान्नवशिष्टे रुद्रो दशमानुवाके चतुर्णां रुद्रस्ततएकस्य नंदीश्वर आत्मा रुद्रस्त
तएकस्य भगवान्स्ततएकस्य शंभुस्ततएकस्य रुद्रस्ततएकस्य भगवान्स्ततो द्वयोः
भुस्ततोऽवशिष्टानां रुद्र इति देवताः॥ प्रथमानुवाके आद्ये अनुष्टुभौ ततएका प्रस्तार
पंक्तिः पंचपदा वा पंक्तिः ततएका षट्पदा जगती ततः सप्तानुष्टुभस्ततोष्टानुवाकाय
जूंषि ततएका प्रस्तारपंक्तिः पंचपदा पंक्तिर्वा ततएकानुष्टुप् ततश्चतस्रो जगत्यस्तत
स्तिस्रस्त्रिष्टुभस्ततएका पंचपदा त्रिष्टुप् महाबृहती वा ततो दश अनुष्टुभस्ततस्त्रीणि
यजूंषि ततस्तिस्रोऽनुष्टुभस्ततएकं यजुरिति छंदांसि॥ अथ चमकानामग्निः कांडऋ
षिः आद्या आग्नावैष्णवी गायत्री शिष्टानां वाजादयो नादिविशिष्टा देवताः॥ यजुर्नि
विनियोगः॥ एवं रुद्रं जपेत्॥ ॐ अग्नाविष्णू सकृज्जपेत्॥ ॐ अग्नाविष्णू इति पंचदशर्चं

स्य सूक्तस्य वसिष्ठ ऋषिः इन्द्रो देवता त्रिष्टुप् ॥ जपे विनि०॥ ॐ त्वन्न इन्द्राग्नी भवतामवोभिः ॥०॥ यू
१३२ यं पात स्वस्तिभिः सदा नः ॥१५॥ ततः कुंभपश्चिमदेशे स्थंडिले अग्निं प्रणीय तदीशान्यां वे
द्यां सेन नवग्रहादीन् तत्तन्मंत्रैरावाह्य षोडशोपचारैः संपूज्य तदीशान्यां शिवं च कुंभं संस्था
प्य तत्र वरुणमावाह्य अग्निसमीपे मत्वा अन्वाधानं कुर्यात् ॥ यथा ॥ इदं समिधा वाद्याय दे
वतापरिग्रहार्थम् अन्वाधानं करिष्ये ॥ अस्मिन्नन्वाहिते अग्नौ इत्यादि चक्षुषी आज्येनेत्यं
तमुक्त्वा नवग्रहान् प्रत्येकमष्टसंख्याभिः समित्तिलाज्याहुतिभिः भुवनेश्वरीं प्रत्येकम
ष्टसंख्याभिः दूर्वातिलमिश्रगोधूमपायसाज्याहुतिभिरित्युक्त्वा शेषेण स्विष्टकृत
मित्यादि सद्यः पश्च्य इत्युक्त्वा जुहुयात् ॥ अन्ये तु गायत्र्यैः भिरिंद्राणीमिंद्रं च प्रत्येकम १३२
ष्टसंख्याभिः दूर्वातिलमिश्रगोधूमपयसाज्याहुतिभिः चतुर्होतव्येह विरंचं चतु
ष्टयं ॥ ततः स्विष्टकृतं हुत्वेति शौनकोनेन्द्राणी इष्टाः होमानभिधानात्तयोर्होमो नास्ति
त्याहुः ॥ तन्मते अन्वाधाने देवताकीर्तनाभावः ॥ आहुतिसंख्या वक्ष्यते ॥ ततस्त्रिस्तर

णादि पूर्णपात्रनिधानान्तं कृत्वा भुवनेश्वरीइंद्राणीइंद्रेभ्यो मुख्यै त्वेभिः चतुरो मुष्टीन् निरूप्या
हुतिवहुत्वाश्च आनिरूप्य गोदुग्धे पायसं श्रपयित्वा आज्यसंस्कारादि आज्यभागांतं कु
र्यात् ॥ ततो यजमानो दक्षिणतउपविश्य ग्रहोमार्थं च जपार्थं च वरयेत् द्विजो बहून् आ
चार्यद्विजैः सह तिचोकारात्वार्यर्त्विजो होमावगमात्तेषां कृत्वेन त्यागयोगात् तैश्च क्रिय
माणहोमे यजमानेन प्रत्याहुति त्यागस्याशक्यत्वात् ॥ तदानीमेवांगप्रधानदेवताउ
द्देश्येन द्रव्यं न मम इति त्यजेत् ॥ ततः आचार्य ऋत्विक् नवग्रहेभ्यो ष्टप्रतोष्टान्यत
मसंख्याकाघृतान्का अर्कादिसमिधस्तिलाहुतीश्च कुत्वाधिदेवताप्रत्यधिदेवता
विनायकादिपंचलोकपालेभ्यस्तान्यून संख्यया जुहुयात् ॥ एभ्यस्तु पालाश्यः ॥
समिधः ग्रहाणां संपदा शेतदन्येभ्यश्च तत्तदिति संप्रदायः ॥ ततो भुवनेश्वर्यै गाय
त्र्याद्युधिमधुघृतादि मिश्रितिस भिर्दूर्वाभिरेकाहुतिरित्येवमष्टसहस्रमष्टशतं
वा दूर्वाहुतीर्घृताक्ततिलमिश्रगोधूमाहुतीः पायसाहुतीर्घृताहुतीश्च जुहुयात्

एवमिंद्राणींद्रयोः प्रागुक्तमंत्राभ्यां होमः विश्वानुष्टयं प्रत्येकमष्टोत्तरसंख्यं भुव
१३२ नेश्वर्ये। अष्टसहस्रं पृश्नं जुहुयात्॥ तस्मा अष्टोत्तरपक्षेतु तयोरष्टाविंशतिरिति सं
प्रदायः॥ पक्षेतु तयोर्नहोमः॥ ततः स्विष्टकृदादि प्रायश्चित्तहोमांतं कृत्वा इंद्रादिदि
क्पालेभ्यो नवग्रहेभ्यो भुवनेश्वर्यै इंद्राणी इंद्रेभ्यः क्षेत्रपाय च सदीपान्माषभक्तो
बलीन्दत्त्वा वैर्दत्वा पूर्णाहुतिं जुहुयात्॥ समुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य
गौतमो वामदेवोग्निस्त्रिष्टुप् चंत्यानगती॥ पूर्णाहुतिहोमे विनि०॥ समुद्रादूर्मिर्मधुमाँ
उदारदुपां०॥ मधुमंतं तडूर्मि॥०॥ ततः प्रणीताविमोकं कृत्वा भुवनेश्वर्यादि कलशो
दकेन पात्रांतरगृहीतेन नतस्त्वचं पंचपल्लवैः सकुशदूर्वैः धृतनववस्त्रं यजमान
धृतनववस्त्रं कंचुकीवृत्तद्वा मस्त्वा ऋतुमतीस्त्रं ऋ लिंगुदंडमुखं आचार्यो १३२
भिषिंचेदभिर्मंत्रैः॥ ते च॥ आपोहिष्ठेति नव ऋचस्यां वरीषः सिंधुद्वीप आ
पोगायत्री॥ अंत्ये द्वे अनुष्टुभौ पंचमी वर्धमाना सप्तमी प्रतिष्ठा अभिषेके वि०

आपोहिष्ठामयो भुवः॥०॥ यएक इद्विदयत इति गौतमो राहूगण इंद्र उष्णिक्॥ अभिषे
के विनि०॥ यएकइद्विदयते वसु मर्ताय दाशुषे॥ ईशानो अप्रतिष्कुत इंद्रो अंग॥ त्रिमि
ष्टुं देवेति सप्तर्चस्य सूक्तस्य वसिष्ठ आद्यानां त्रयाणामग्निरंत्यानां चतुर्णां विश्वेदेवा आ
द्यागायत्री द्वितीयानुष्टुप्॥ चतस्त्रो गायत्र्यो त्ये द्वे अनुष्टुभौ॥ अभिषेके विनियोगः॥
उभयं शृणवच्च नेति भर्ग इंद्रो बृहती॥ अभिषेके विनि०॥ उभयं शृणवच्च न इंद्रो अ
र्वागिदं वचः॥ सत्राच्या मघवा सोमपीतये धिया शविष्ठ आगमत्॥ स्वस्तिदा विशो
यं निंद्रामिंद्रोनुष्टुप्॥ अभिषेके विनि०॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी॥ वृ
षेंद्रः पुर एतु नः सोमपा अभयंकरः॥ त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्॥ अभिषेके०॥
त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मा
मृतात्॥ जातवेदसे मारीचः कश्यपो दुर्गा त्रिष्टुप्॥ अभिषेके वि०॥ समुद्रज्येष्ठा

इति चत्तसृणां वसिष्ठ आपस्त्रिष्टुप्॥ अभिषेके वि०॥ समुद्रज्येष्ठाः सलिलस्य मध्यात्॥०॥४॥
१३४ त्रायंतामिति चत्तसृणां सप्तऋषय आपोनुष्टुप्॥ अभिषेके विनि०। त्रायंतामिह देवास्त्रा
या॥४॥०॥ इमा आप इति तिसृणां सप्तऋषय आपोनुष्टुप्॥ इमा आपः शिवतमा इमाः०
द्रवस्य त्वेयापस्त्वं बद्धा स्वांग तो ह्वि भिर्मन्त्रैः॥ ईशानमीशानं जगत ईशानो जगती॥ अ
भिषेके वि०॥ तमीशानं जगतः॥०॥१॥ ऋक्॥ त्वमग्ने रुद्र इति गृत्समदोग्निर्जगती॥
अभिषेके वि०॥ त्वमग्ने रुद्रो असुरो महो दिवः॥०॥ ऋक्१॥ तमु ष्टुहीत्यांगिरसास्ति
ष्ठी रुद्रस्त्रिष्टुप्॥ अभिषेके वि०॥ तमु ष्टुहि यः स्विषुः सुधन्वा॥०॥१॥ भुवनस्य
पितरं ऋजिश्वा रुद्रस्त्रिष्टुप्॥ अभिषेके वि०॥ भुवनस्य पितरं। गी। भिराभि०॥ कवि
न पितासः॥१॥ ऋक्॥ याते रुद्र इति कश्यपो रुद्रः स्वराडनुष्टुप्॥ अभिषेके विनियो १३४
गः॥ या ते रुद्र शिवा तनूरघोरापापकाशिनी॥ तया नस्तन्वा शंतमया गिरिशंताभि
भिचाकशीहि॥ यज्जाग्रत इति षण्णां शिवसंकल्प मंत्राणां प्रजापतिर्मन्त्रि

ष्टुप्॥ अभिषेके वि०॥ यजुषा एते॥ यज्जाग्रतो दूरमुदैतु दैवं तदु सुप्तस्य तथैवेति॥ दूरं
गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु॥ येनेदं विश्वं जगतो बभूव दे
वा पिमहत्तो जातवेदाः॥ तद्देवाग्निस्तमसो ज्योतिरेकं तन्मे०॥ येन द्यौः पृथिवी चांतरि
क्षं च ये पर्वताः प्रदिशो दिशश्च॥ तेनेदं जगद्व्याप्तं प्रजानां तन्मे मनः॥०॥ ये मनो हृद
ये ये च देवा ये दिव्या आपो ये सूर्यरश्मिभिः॥ ते श्रोत्रे चक्षुषी संचरंतं तन्मे मनः॥०॥४॥
अचिंत्या चाप्रमेयं चाव्यक्ता व्यक्तपरं यत्॥ सूक्ष्मात्सूक्ष्मतरं ज्ञेयं तन्मे मनः॥०॥ पूर्वाए
कावद्रम्मानं च सहस्रं चायुतं नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च॥ समद्रश्च मध्यं चां
तश्च परार्धश्च तन्मे मनः॥ शिवसंकल्पमस्तु॥६॥ इंद्र त्वा वृषभं वयमिति विश्वानां वि
श्वामित्र इंद्रो गायत्री॥ अभिषेके वि०॥ इंद्र त्वा वृषभं वयं सुते०॥ तव धुक्षास द्रूदयः
॥पू॥ ततः सुरास्तमभिषिंचन्निति नवभिः पौराणैर्मंत्रैः रभिषिंचेत्॥ ततः कलशो
दकेनान्येन चोदकेन सुस्नातो दंपती शुक्लवाससौ गंधमाल्यादिधृत्वोपवीतालंना

त्पत्नीं दक्षिणतः ॥ ततो यजमानोग्निं संपूज्य विभूतिं धृत्वाचार्यादीनां गंधपुष्पवस्त्रा
लंकारादिभिर्यथाशक्ति पूजयित्वा ॥ आचार्याय धेनुं दक्षिणां दद्यात् ॥ दक्षिणात्वेन
१३५ वास्याः दक्षिणांतरं अनवस्थाप्रसंगात् ॥ ततो ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्वा हु
त्वापि नद्युहं दक्षिणां दद्यात् ॥ अत्र धेनुन्यायेनादक्षिणात्वे प्राप्ते सदक्षिणम
नड्वाहं प्रपद धाडुडुनापिने इति प्रतिप्रसवप्रसक्तकरणात् सदक्षिणत्वं ॥ ततोन्ये
भ्यः ऽन्त्विग्भ्यस्तेभ्यश्च ब्राह्मणेभ्यः भूयसीं दक्षिणां दद्यात् ॥ ततो ग्रहपीठदेवता
नां भुवनेश्वर्यादीनां चोत्तरपूजां पंचोपचारैः कृत्वा क्षमापयेत् यांतु देवगणा इति विस
र्ज्याचार्यं गृहस्थं प्रतिपाद्याग्निं संपूज्य गच्छ गच्छ सुरश्रेष्ठेति विसर्जयेत् ॥ ततो ब्राह्म १३५
णाः महाशांतिं पठेयुः सा यथा ॥ आ नो भद्रा इति दशानां गोतमो राहूगण विश्वेदे
वाः आद्याः पंच जगत्यः षष्ठी विराट् सप्तमी जगती ॥ ततस्तिस्रस्त्रिष्टुभः ॥ ॐ आ
नो भद्राः ॥ अदितिर्ज्ञातिमदितिर्जनित्वं ॥ १० ॥ स्वस्ति नो मिमीतां इति पंचानां स्वस्त्या

त्रेयो विश्वेदेवा आद्यास्तिस्रस्त्रिष्टुभः ॥ ततो अनुष्टुभः ॥ स्वस्ति नो मिमीतामश्विनाभ
गः ॥ ५ ॥ ज्ञानमा संगमेमहि ॥ शं न इंद्राग्नी इति पंचदशानां वसिष्ठो विश्वेदेवास्त्रि
ष्टुभः ॥ शं न इंद्राग्नी भवतामवोभिः ॥ १५ ॥ स्वमू इति तिसृणां तार्क्ष्योरिष्टनेमिस्ता
र्क्ष्यस्त्रिष्टुभ् ॥ त्यमूषु वाजिनं देवजूतं सहा ॥ ३ ॥ तच्छंयोः शंयुर्विश्वेदेवाः शक्वरी ॥ सर्व
शांतौ शांतिपाठे विनियोगः ॥ तच्छंयोरावृणीमहे ॥ ॥ शं चतुष्पदे ॥ ततो यजमानो नवग्रह
प्रीत्यर्थं त्रीन् भुवनेश्वरीं ब्राह्मणांश्च प्रीत्यर्थं प्रत्येकं त्रीं त्रीन् ब्राह्मणान्भोजयित्वा संके
ल्प्य वा विप्राशिषो गृहीत्वा सुहृद्युतो भुंजीत ॥ एवं कृते सर्वारिष्टशांतिर्भवति ॥ ततः
शुभकाले गर्भाधानं कुर्यात् ॥ ॥ इति प्रयोगरत्ने दुष्टरजोदर्शनशांतिः ॥ अथ चं
द्रसूर्योपरागकाले प्रथमरजोदर्शने शांतिर्लिख्यते ॥ सर्वोपरागस्य पौर्णमास्य
मावास्याभ्यामविनाभावात्तदतिरिक्ते वारादौ दुष्टपायुक्तां शांत्याः समुच्चीयते ॥ नि

मित्रमदात्॥ अदृष्टार्थलाचप्रत्ययस्यविध्यभावेनकार्यकारित्वान्नवग्रहमखेनाममंत्रहो
१३९ मेनारिष्टहोमानामिवानपात।निरस्यायोगात्॥ ग्रहणमात्रेलियमेव॥ अत्रचपुनः
श्रवणाभावान्नवग्रहमखःकृताकृतइतिविवेकः॥ तत्रकेवलयोः प्रयोगः॥ पूर्वो
क्तकालेसंकल्पकः शुचिः प्राङ्मुखउपविश्यप्राणानायम्यदेशकालौसंकीर्त्यमम
पत्न्याश्चंद्रोपरागप्रथमराजोदर्शनसूचितारिष्टनिरासद्वाराश्रीपरमेश्वरप्री
त्यर्थंशांतिकरिष्ये॥ इतिसंकल्प्यप्राग्वद्दत्तिक्पूजांकृत्वा॥ नवग्रहपक्षेसनवग्रहामि
ति॥ सूर्योपरागेतुसूर्योपरागप्रथमेत्यादिवदेत्॥ ततः आचार्यः शुचिदेशेगोम
येनोपलिप्यतत्रपंचवर्णरजोभिरष्टदलपद्मंकृत्वातदुपरिनवश्वेतंवस्त्रमुद १३६
मदशंसंस्थाप्ययथाशक्तिरजतनिर्मितांचंद्रप्रतिमामाप्यायस्वेतिगोतमःसोमो
गायत्री॥ चंद्रावाहनेविनियोगः॥ आप्यायस्वसमेतुते०॥ चंद्रमावाहयामीतिस्था

पयेत्॥ सूर्यग्रहेतुयथाशक्तिसुवर्णनिर्मितामारुह्लेणेनहिरण्यस्तूपःसवितात्रिष्टु
प्॥ सूर्यावाहनेविनियोगः॥ आकृष्णेन०॥ सूर्यमावाहयामिस्थापयेत्॥ ततोय
थाशक्तिसीसनिर्मितांराहुप्रतिमांस्वर्भानोरधत्रिराहुरनुष्टुप्॥ राहुमावाहनेवि०
स्वर्भानोरधयदिंद्रमायाः॥०॥ राहुमावाहयामीति तदुत्तरतःस्थापयेत्॥ ततोय
स्मिन्नक्षत्रेतन्नक्षत्रदेवताप्रतिमांयथाशक्तिसुवर्णनिर्मितांतत्तन्मैत्रैर्नाममंत्रैर्वा
ॐअश्विनावावाहयामीनमइतिप्रणवादिनमोंतैःस्थापयेत्॥ मंत्रस्थापत्वेवा
नामषष्ठ्योवाक्यानीतिप्रसिद्धाः॥ नामानितु॥ अश्विनौ॥ यमः॥ अग्निः॥ प्रजापतिः॥
सोमः॥ रुद्रः॥ अदितिः॥ बृहस्पतिः॥ सर्पाः॥ पितरः॥ भगः॥ अर्यमा॥ सविता॥ त्वष्टा॥
वायुः॥ इंद्राग्नी॥ मित्रः॥ इंद्रः॥ निर्ऋतिः॥ आपः॥ विश्वेदेवाः॥ विष्णुः॥ वसवः॥ वरु
णः॥ अजैकपात्॥ अहिर्बुध्न्यः॥ पूषेति॥ एवंदेवतात्रयमावाहोमिरेवमंत्रैःक्रोडा
नुसमयेनषोडशोपचारैःपूजयेत्॥ तत्रचंद्रग्रहेचंद्रायश्वेतानिवस्त्रगंधमाल्या

१३७ निद्र्यानि॥ सूर्यग्रहे तु॥ सूर्याय रक्तवस्त्ररक्तचंदनरक्ताक्षतकरवीरपुष्पाणि देयानि॥ 91/6
ाहुकेतुकृष्णानि॥ नक्षत्रदेवताभ्यः श्वेतानि॥ ततः पश्चिमतोऽग्निं प्रतिष्ठाप्य पक्षेन
वग्रहान्प्यावाहनपूर्वकं संपूज्यान्वाधानं कुर्यात्॥ यथा॥ इह समिधो ग्रहीत्वा
चक्षुषी आज्येनेत्यंतमुक्त्वा पक्षे पूर्ववन्नवग्रहानुद्दिश्याष्टाविंशत्यन्यतमसंख्या
यमुद्दिश्य चंद्रममुकसंख्याभिः पालाशसमिदाज्यचरुतिलाहुतिभिः राहुं अ
मुकसंख्याभिः दूर्वाज्यचरुतिलाहुतिभिः नक्षत्रदेवताममुकसंख्याभिः पालाश
समिदाज्यचरुतिलाहुतिर्यक्ष्ये राषणत्याद्युक्त्वा जुहुयात्॥ सूर्यग्रहे चंद्रस्थाने
सूर्यममुकसंख्याकैः समिदाज्यचरुतिलाहुतिभिरिति विशेषः॥ एवमन्वाधाय प्र १३७
णीताप्रणयनांते हुत्वा त्रिभ्याममुष्मै त्वेति चतुरश्चतुरो मुष्टीन्निरूप्य चरुं श्रपयित्वा
ज्यभागांतं कुर्यात्॥ ततो यजमानो दक्षिणातो देवता उद्दिश्य त्यजेत्॥ ततोऽन्वाधानक्र
मेण जुहुयात्॥ ततः तिसृणां दूर्वाणामेकैकाहुतिसंनिधश्चत्रिमध्वक्ताः कार्याः॥

इति नारायणभट्टीयं प्रयोगरत्नम्।

Prayoga ratnam